CC-0. In Public Domain. Digitization by eGangotri

प्रथम खण्ड:

गद्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुहरि सुवेदी कक्षा ८

स्वाध्यायोऽध्येतव्यः



विष्णुहरि सुवेदी कक्षा ८

द्यौः शान्तिरन्तरिक्षं शान्तिः पृथ्वी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ३६–५७ ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतं
शृणुयाम शरदः शतं प्रब्रवाम शरदः
शतमदीनाः स्याम शरदः शतं भूयश्च
शरदः शतात् ॥ ३६–२४ ॥

कठिन शब्दार्थः—एधि = अस्तु (पुरुष व्यत्ययः), उच्चरत् = उदेति ।

अभ्यासः

(१) मनुष्याणां परमायुर्वैदिकैरार्यैः कति निर्धारितम् ?
(२) किमिति सूर्यस्य एतावान् महिमा गीयते ?
(३) आर्यैः किमाशास्यत आत्मनि ?
(४) चक्षुः शब्देन सूर्यस्य बोधने किं तात्पर्यम् ?
(५) वैदिकाः प्रकृतेरुपासका आसनिति साधयत
(६) शरदः शतमित्यस्य कोऽभिप्रायः ?
(७) 'वेद शब्दस्य कोऽर्थः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द द द



त्रयः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यम् ऊषुः देवाः मनुष्याः असुराः उषित्वा ब्रह्मचर्यम् देवाः ऊचुः ब्रवीतु नः भवान् इति ।

तेभ्यः ह एतत् अक्षरम् उवाच 'द' इति । व्यज्ञासिष्टाः ३ इति । व्यज्ञासिष्टमः इति ह ऊचुः दाम्यत इति न आत्थ इति ॐ इति ह उवाच व्यज्ञसिष्टाः इति ॥१॥

अथ ह एनं मनुष्याः ऊचुः ब्रवीतु नः भवान् इति । तेभ्यः ह एतद् अक्षरम् उवाच 'द' इति । व्यज्ञासिष्टाः ३ इति । व्याज्ञासिष्टम् इति ह ऊचुः दत्त इति न आत्थ इति ॐ इति ह उवाच व्यज्ञासिष्टाः इति ॥ २ ॥

अथ ह एनम् असुरा ऊचुः ब्रवीतु नः भवान् इति । तेभ्यः ह एतद् अक्षमर उवाच 'द' इति । व्यज्ञासिष्टाः ३ इति । व्यज्ञासिष्टमः इति ह ऊचुः दयध्वम् इति न आत्थ इति ॐ इति ह उवाच व्यज्ञासिष्ट इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेतदेवैषा दैवी वागनुवदति स्तनयित्नु 'द द द' इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयं शिक्षेद्दमं दानं दयामिति ॥३॥

(उपनिषदः)

अभ्यासः

१ देवाः 'द' इत्यस्यार्थं कथमकुर्वन् ?
२. मनुष्याः 'द' इत्यस्यार्थं कथमकुर्वन् ?
३. असुराः 'द' इत्यस्यार्थं कथमकुर्वन् ?
४. वाग्देवी संक्षेपेण 'ददद' इत्यस्मात् किमुपदिशति ?
५. सम्सन्धं स्थापयत–('क' अंशस्थ शब्दानम् 'ख' अंशस्थ शब्दैः सह)

(क)	(ख)
मनुष्याः	दयध्वम् असुराः
असुराः	दत्त मनुष्याः
देवाः	दाम्यत देवाः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री राम जय राम जय जय राम

पंचतन्त्रकथा

पंचतन्त्र कथा

कस्मिंश्चिदधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म। तस्य भार्य्या प्रसूता सुतम् अजनयत्। तस्मिन् एव दिने नकुली नकुलं प्रसूता। अथ सा सुतवत्सला दारकवत्तमपि नकुलं स्तन्यदानाभ्यङ्गमर्दनादिभिः पुपोष। परं तस्य न विश्वसिति--'यत् कदाचित् एष स्वजातिदोषवशात् अस्य दारकस्य विरुद्धम् आचरिष्यति' इति। उक्तञ्च--

कुपुत्रोऽपि भवेत्पुंसां हृदयानन्दकारकः।
दुर्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सा कदाचित् शय्यायां पुत्रं शाययित्वा जलकुम्भम् आदाय पतिमुवाच– "ब्राह्मण! जलार्थमहं तडागं यास्यामि त्वया पुत्रोऽयं नकुलतो रक्षणीयः"। अथ तस्यां गतायां ब्राह्मणोऽपि शून्यं गृहंमुकत्वा भिक्षार्थं क्वचिन्निर्गतः। अत्रान्तरे दैववशात् कृष्णसर्पो बिलान्निष्क्रान्तः। नकुलोऽपि तं स्वभाववैरिणं मत्वा भ्रातुः रक्षणार्थं सर्पेण सह युद्ध्वा सर्पं खण्डशः कृतवान्। ततो रुधिराप्लावितवदनः सानन्दः स्वव्यापारप्रकाशनार्थं मातुः सम्मुखो गतः। मातापि तं रुधिरक्लिन्नमुखमवलोक्य "अनेन दुरात्मना दारको भक्षितः" इति विचिन्त्य कोपात् तस्योपरि तं जलकुम्भं चिक्षेप। एवं सा नकुलं व्यापाद्य यावत् प्रलपन्ती गृहमागच्छति, तावत् सुतः तथैव सुप्तः तिष्ठति। समीपे कृष्णसर्पः खण्डशः कृतमवलोक्य पुत्रवधशोकेन आत्मशिरोवक्षःस्थलं च ताडयितुम् आरब्धा।

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम्।
पश्चाद्भवति सन्तापो ब्राह्मण्यां नकुलाद्यथा॥

कठिनाः शब्दाः

प्लावितवदनः, स्वाभाविकं वैरम्, व्यसनी, दारकः व्यापाद्य।

अभ्यासः

१. ब्राह्मण्या कस्मात् कारणात् नकुल
२. 'पुत्रस्नेहेन पालितमपि नकुलपुत्रं ब्राह्मणी किमर्थं नैव विश्वसिति'?
३. नकुलपुत्रः, ब्राह्मणपुत्रस्य मित्रमासीन्नता?
४. अपरीक्ष्य करणे किं फलमनुभूयते?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्त्वमसि



श्वेतकेतुः ह आरुणेय आस तं ह पिता उवाच श्वेतकेतो वस ब्रह्मचर्यम् न वै सोम्य अस्मत्कुलीनः अनूच्य ब्रह्मबन्धुः इव भवति इति ॥१॥

सः ह द्वादशवर्षः उपेत्य चतुर्विंशतिवर्षः सर्वान् वेदान् अधीत्य महामना अनूचानमानी स्तब्धः एव एयाय तम् ह पिता उवाच ॥२॥

श्वेतकेतो यत् नु सोम्य इदं महामना अनूचानमानी स्तब्ध असि उत तम् आदेशम् अप्राक्ष्यः येन अश्रुतं श्रुतं भवति अमतम्मतम् अविज्ञातम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञातम् इति कथम् नु भगव स आदेश भवति इति ।।३।।

यथा सोम्य एकेन मृत्पिण्डेन सर्वम् मृन्मयम् विज्ञातम् स्यात् वाचा आरम्भणम् विकारः नामधेयम् मृत्तिका इतिएव सत्यम् ।।४।।

यथा सोम्य एकेन लोहमणिना सर्वम् लोहमयम् विज्ञातम् स्यात् वाचा आरम्भणम् विकारः नाम धेयम् लोहम् इति एव सत्यम् ।।५।।

यथा सोम्य एकेन नखकृन्तनेन सर्वम् कार्ष्णायसं विज्ञातं स्यात् वाचा रम्भणम् विकारः नामधेयम् कृष्णायसम् इति एव सत्यम् एवम् सोम्य सः आदेशः भवति इति ।

न वै नूनम् भगवन्तः ते एतत् अवेदिषुः यत् हि एतत् एव अवेदिष्यन् कथम्मे न अवक्षन् इति भगवान् तु एव मे तत् अब्रवीतु इति तथा सोम्य इति ह उवाच ।

× × ×

सोम्य विजानी हि न इदम् अभूतम् भविष्यति इति । सत् मूला सोम्य इमाः सर्वाः प्रजाः सत् आयतनाः सत् प्रतिष्ठाः ।।

इमाः सोम्यः नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते पश्चात् प्रतीच्यः ताः समुद्रात् समुद्रम् एव आपियन्ति सः समुद्रः एवभवति ताः यथातत्र न विदुः इयम् अहम् अस्मि इयम् अहम् अस्मि इति । एवम् एव खलु सोम्य इमाः सर्वाः प्रजाः सतः आगम्य न विदुः सतः आगच्छामहे इति । सः यः एषः अणिम एतत् आत्म्यम् इदम् सर्वम् तत् सत्यम् सः आत्मा तत् त्वम् असि (तत्वमसि) श्वेतकेतो इति ।

(छांदाग्योपनिषद्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कठिनाः शब्दाः

अनूच्य, अनूचानः, स्तब्धः, एयाय, अप्राक्षीः, वाचारम्भणम्, विकारः, कार्ष्णायसम्, आपियन्ति ।

अभ्यासः

१. श्वेतकेतुना द्वादश वर्षाण्यधीत्यापि किं किं नैव शिक्षितम् ?
२. स्वपितुः कां शिक्षामवाप श्वेतकेतुः ?
३. सत्यस्य महिमानं दर्शयित्वा 'तत्त्वमसि' इत्यस्यार्थं कुरुत ।
४. रिक्तस्थानेषुपयुक्तान् शब्दान् स्थापयतः—
   (क) एकेन लोहमणिना सर्वं………………विज्ञातम् ।
   (ख) सर्वाः प्रजाः………………न विदुः ।
   (ग) अस्मात्कुलीनोऽननूच्य………………भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मदोन्मत्तस्य फलम्

कस्मिंश्चिदधिष्ठाने उज्ज्वलको नाम रथकारः प्रतिवसति स्म । स चातीव
दारिद्र्योपहतश्चिन्तितवान्-'अहो धिगियं दरिद्रतास्मद्गृहे । अतः सर्वोऽपि जनः
स्वकर्मणैव रतस्तिष्ठति । अस्मदीयः पुनर्व्यापारो नात्राधिष्ठानेऽर्हति । यतः
सर्वलोकानां चिरन्तनाश्चतुर्भूमिका गृहाः सन्ति । मम च नात्र । तत्किं मदीयेन
रथकारत्वेन प्रयोजनम्' । इति चिन्तयित्वा देशान्निष्क्रान्तः ।

यावत्किंचिद्वनं गच्छति तावद्गह् वराकावनगह् नमध्ये सूर्यास्तमनवेलायां
स्वयूथाद्र भ्रष्टां प्रसववेदनया पीड्यमानामुष्ट्रीमपश्यत् । स च दासेरकयुक्ता-
मुष्ट्रीं गृहीत्वा स्वस्थानाभिमुखः प्रस्थितः । गृहमासाध रज्जु गृहीत्वा तामुष्ट्रिकां
बबन्ध । ततश्च तीक्ष्णं परशुमादाय तस्याः पल्लवानयनार्थं पर्वतैकदेशे गतः ।
तत्र च नूतनानि कोमलानि बहूनि पल्लवानि छित्त्वा शिरसि समारोप्य तस्याग्रे
निचिक्षेप । तया च तानि शनैः शनैर्भक्षितानि । पश्चात्पल्लवभक्षणप्रभावा-
दहर्निशं पीवरतनुरुष्ट्री संजाता । सोऽपि दासेरको महानुष्ट्रः संजातः । ततः
नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बं परिपालयति । अथ रथकारेण बल्लभत्वा-
द्दासेरकग्रीवायां महती घण्टा प्रतिबद्धा । पश्चाद्रथकारो व्यचिन्तयत्--'अहो
किमन्यैर्दुष्कृतकर्मभिः, यावन्ममैतस्मादेवोष्ट्रोपरिपालनादस्य कुटुम्बस्य भव्यं
संजातम् । तत्किमन्येन व्यापारेण ।' एवं विचिन्त्य गृहमागत्य प्रियामाह--
'भद्रे, समीचीनाऽयं व्यापारः । तव संमतिश्चेत्कुतोऽपि घनिकात्किंचिद् द्रव्यमा-
दाय मया गुर्जरदेशे गन्तव्यं कलभग्रहणाय । तावत्त्वयैतौ यत्नेन रक्षणीयौ ।
यावदहमपरामुष्ट्रीं नीत्वा समागच्छामि ।

ततश्च गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः । किं बहुना ? तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा कृतं यथा तस्य प्रचुरा उष्ट्राः करमाश्च संमिलिताः । ततस्तेन महदुष्ट्रयूथं कृत्वा रक्षापुरुषो धृतः । तस्य, प्रतिवर्षं वृत्त्यां करममेकं प्रयच्छति । एतिवर्षं अन्यदहर्निशं दुग्धपानं तस्य निरूपितम् । एवं रथकारोऽपि नित्यमेवोष्ट्री-करभव्यापारं कुर्वन्सुखेन तिष्ठति । अथ ते दासेरका अधिष्ठानोपवन आहारार्थं गच्छन्ति । कोमलवल्लीर्यथेच्छया भक्षयित्वा महति सरसि पानीयं पीत्वा सायंतनसमये मन्दं मन्दं लीलया गृहमागच्छन्ति । स च पूर्वदासेरको मदातिरे-कात्पृष्ठ आगत्य मिलति । ततस्तैः कलभैरभिहितम् --'अहो, मन्दमतिरयं दासेरको यथा यूथाद् भ्रष्टः पृष्ठे स्थित्वा घण्टां वादयन्नागच्छति । यदि कस्यापि दुष्टसत्वस्य मुखे पतिष्यति, तन्नूनं मृत्युमवाप्स्यति' ।

अथ तस्य तद्वनं गाहमानस्य कश्चित्सिंहो घण्टारवमाकर्ण्य समायातः । यावदवलोकयति, तावदुष्ट्रीदासेरकाणां यूथं गच्छति । एकस्तु पुनः पृष्ठे क्रीडां कुर्वन्वल्लरीश्चरन्यावत्तिष्ठति, तावदन्ये दासेरकाः पानीयं पीत्वा स्वगृहे गताः । सो पि वनान्निष्क्रम्य यावद्दिशोऽवलोकयति, तावन्न कंचिन्मार्गं पश्यति वेत्ति च यूथाद् भ्रष्टो मन्दं मन्दं बृहच्छब्दं कुर्वन्यावत्कियद्दूरं गच्छति, तावत्तच्छब्दा-नुसारी सिंहोऽपि क्रमं कृत्वा निभृतोऽग्रे व्यवस्थितः । ततो यावदुष्ट्रः समीप-मागतः, तावत्सिंहेन लम्फयित्वा ग्रीवायां गृहीतो मारितश्च । अतोऽहं ब्रवीमि-

सतां वचनमादिष्टं मदेन न करोति यः ।
स विनाशमवाप्नोति घण्टोष्ट्र इव सत्वरम् ॥७४॥

कठिनाः शब्दाः

चतुर्भूमिकाः, दासेरकः कलभः, करभः, अहर्निशम् ।

अभ्यासः

१. रथकारः कथं धनवान् सञ्जातः ?
२. कलभैः किमभिहितं ?
३. रथकारेण प्रियां किमाह ?
४. केनार्कपितो सिंहः दासेरकमसृतवान् ?
५. मदोन्मत्तेन दासेरकेन किमनुभूतम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्स्येन्द्रनाथः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धगोरक्षानाथस्य गुरुर्मत्स्येद्रनाथो नाम महासिद्धः। यो हठयोगमार्गस्य प्रथमप्रवर्तकस्य श्रीशङ्करस्वरूपस्य आदिनाथस्य शिष्योऽभूत्। कदाचित् शिवः पार्वतीं योगविद्यामुपदिशतिस्म। नारायणो मत्स्योदरमनुप्रविश्य निभृतं तत् सर्वमश्रौषीत् तदनु। लब्धयोगतत्वः स बालकरूपेण मत्स्योदरान्निर्गम्य मत्स्येन्द्र-



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाथनाम्ना प्रसिद्धोऽभूत् इति केचन वर्णयन्ति ।

अयं कामरूपदेशीयो योगमार्गस्य देशिक इत्यपि केचन निरूपयन्ति । यथातथाप्यसौ योगमार्गस्य देशीक इत्यत्र नविप्रतिपत्तिः । सोऽयं योगिप्रवरो नेपालाधिराज्ये बहुशः संमान्यते लोकैः । एतदीया किंवदन्त्योऽपि अनेकशः श्रूयन्ते । बौद्धैस्तथा शैवैः एषः श्रद्धाभक्ति भावेन पूज्यते सविशेषम् । नेपाले धर्मसमन्वयः सुदृढोऽस्ति । नखमांसयोरिवाविच्छेद्योऽनयोः सम्बन्धः । यान्देवान् बौद्धाः सम्पूजयन्ति शैवा अपि तान् भक्तिभावेन समर्चयन्ति । यान् शैवाः समुपासन्ते तान् बौद्धा अपि सभाजयन्ति । तस्मादेव मत्स्येन्द्रनाथप्रतिष्ठा सर्वैः सर्मथिता । ललितपुरे रक्त-मत्स्येन्द्रनाथस्य मन्दिरं विद्यते, श्वेतमत्स्येन्द्र नाथस्य मन्दिरं तथा कान्तिपुरे शोभते ।

अस्यप्रतिमूर्तिश्चिरान्महति मन्दिरे प्रतिष्ठापिताऽहरहः सविशेषं पूज्यते । अस्याः प्रतिवर्षं बहूनि दिनानि महता समारम्भेण रथयात्रापि नगरे विधीयते । ललितपुरस्य जाउलाखेलनाम्नि स्थाने अस्य कञ्चुकं लक्षाधिकेभ्यः जनेभ्यः प्रदर्श्यते । तस्मिन् महोत्सवे तद्दर्शनार्थं कर्मचारिभ्यः दिनार्धावकाशं सर्वकारः प्रददाति । नेपालदेशे मत्स्येन्द्र नाथयात्रा प्रसिद्धा वर्तते । प्रायशः बौद्धाः महता समारोहेण यात्रां मानयन्ति । रथं परितः सहस्रदीपान् प्रज्ज्वालयन्ति नार्यः ।

अस्यैव शिष्यो गुरुगोरक्षनाथः नेपालराष्ट्रनिर्मातुः महामहाधिराजस्य श्री ५ पृथ्वीनारायणदेवस्य अराध्य आसीत् । अस्य विषये 'किंवदन्ती' एतादृशी विद्यते । योगिप्रवरो मत्स्येन्द्रनाथस्तीर्थानि पर्यटन् कदाचितयोध्यां प्राप । भिक्षार्थं कस्यापि विप्रस्य द्वारमुपाययौ । तद्गृहस्थितायाः विप्रायाः निरपत्यतादीनं मुखं दृष्ट्वा सत्पुत्रावाप्तये योगकरण्डकाद्विभूतिं गृहीत्वाऽशनाय तस्यै प्रायच्छत् । कयापि दुराशयया प्रतिवेशिन्याऽपवाहिता सा विप्रा तां विभूतिमेकस्मिन् गर्ते प्रचिक्षेप ।

भूयो द्वादशभिर्वर्षैस्तदेव गृहं भिक्षायै प्राप्तेन तेन मत्स्येन्द्रनाथेन क्व ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्र इति पृष्टा सा ब्राह्मणी भयविकृतया वाचा यथावृत्तं सर्वं न्यवेदयत् ।

अमोघसङ्कल्पः स योगी एहि वत्स ! इत्याह्वयत् ततः द्वादशवार्षिको बालकः तस्माद् गर्तात् प्रादुरासीत् । योगीश्वरेण दत्तयोगविद्योपदेशः स गोरक्षनाथनाम्ना प्रसिद्धो योगी बभूवेति ।

सोऽयं मत्स्येन्द्रनाथोपदिष्टमार्गेण योगं साधयन् महतीं ख्यातिं प्राप ।

नेपालदेशे गुरोः मत्स्येन्द्रनाथस्य तदीयशिष्यस्य गोरक्षनाथस्य च प्रसिद्धिः सर्वातिशायिनी विद्यते । सिद्धानाम् आशीर्वादात् हिन्दूराज्यं नेपालः एकएवावशिष्टो वर्तते । गुरुशिष्ययोः मत्स्येन्द्रनाथगोरक्षनाथयोः वरप्रसादात् नेपालः अद्यावधि स्वतन्त्रः सार्वभौमसत्तायुक्तश्च विद्यते । गोरक्षनाथमठे अद्यापि नाथसंप्रादायानुयायिनः कति चन योगिनस्तिष्ठन्ति । नेपालाद् बहिर्भारते वर्षेऽपि नाथ संप्रदायानुयायिनो विद्यन्ते ।

मत्स्येन्द्रनाथस्य माहात्म्यं नेपालस्य सर्वे जानन्ति । अत्रत्या शैवा बौद्धा अपि हिन्दूधर्मावलम्बिनो देवतामूर्तिं पूजयन्ति, श्राद्धं कुर्वन्ति, तीर्थाटनं कुर्वन्ति ।

कठिनाः शब्दाः

हठयोगः, निभृतम्, अनुप्रतिक्ष्य, कामरुपम्, अविच्छेद्यः, सभाजयति, करण्डकम्, यथावृत्तम्

अभ्यासः

१. "मत्स्येन्द्रनाथः" इति नाम कथमभवत् ?
२. मत्स्येन्द्रनाथस्य कन्चुकं कस्मिन् पर्वणि तथा कुत्र प्रदर्श्यते ? अस्य महिमा कः अस्ति ?
३. "नेपालदेशे धार्मिककलहो नास्ति—मत्स्येन्द्रनाथगोरक्षनाथयोः कारणतः" अस्योक्तेः पुष्टिं कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. गोरक्षनाथस्य विषये "किवदन्ती" कीदृशी अस्ति ?

५. श्वेतमत्स्येन्द्रनाथस्य मन्दिरं कुत्रास्ति√एतच्चिह्नेन निरूपयत ।

(क) जाउलाखेल नामकस्थाने ।

(ख) कान्तिपुरे ।

(ग) वराहक्षेत्रे ।

रक्तमत्स्येन्द्रनाथस्य मन्दिरं कुत्रास्ति√एतच्चिह्नेन निरूपयत ।

(क) कान्तिपुरे ।

(ख) भक्तपुरे ।

(ग) ललितपुरे ।

६. श्री ५ पृथ्वीनारायण शाहदेवस्याराध्यदेवः कः ?

७. को नाम नाथसंप्रदायः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धन्यो याज्ञवल्क्यः, धन्या नेपालभूमिः

मिथिलावास्तव्यो महर्षिः योगीयाज्ञवल्क्यः अस्माकं नेपालराष्ट्रस्य अत्युज्ज्वला महती विभूतिः। वाजसनेयशाखामूलानां शुक्लयजुषां प्रथमाचार्यस्य तस्य कृतयो "याज्ञवल्क्य शिक्षाशतपथ ब्राह्मण-प्रतिज्ञासूत्र-योगियाज्ञवल्क्यस्मृतयो" नेपालमातुःसन्ततेः सनातनं महिमानं प्रकाशयन्त्यः प्रकाशन्ते।

देवरातसुतो याज्ञवल्क्यो वेदविद्यामर्थयन् श्रोत्रियं महर्षिं वैशम्पायनमुपससाद। वैशम्पायनो भागिनेयं तं विधिवदुपनीय निगदाख्यं यजुर्गणमध्यापयामास।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ कदाचन पितृश्राद्धे संलग्नत्वात् प्रतिश्रुतां ब्रह्मर्षिगोष्ठीमुपस्थातुमपारयतस्तस्य वैशम्पायनस्य तदानीन्तनेन नियमेन वाचिक ब्रह्महत्यादोष उदपद्यत। तदंहो निबर्हणाय वैशम्पायनः स्वान्तेवासिनो ब्रह्महत्यामार्जनक्षमं व्रतमादिदेश। तदा विद्यातपः प्रभाववान् याज्ञवल्क्यः प्रोवाच—"आचार्यं, भवदुक्तं व्रतं सुदुश्चरमप्यहमेक एवाचरिष्ये, किमेतेषामल्पसाराणामादेशेन" इति। याज्ञवल्क्योक्तिमवलेपपूर्णां मन्वानो वैशम्पायनस्तस्मै नितराँ चुक्रोध, आह च तम् रे याज्ञवल्क्य, ब्राह्मणानामवमन्तासि। मत्तोऽधीतं सर्वं त्यज निर्गच्छ च मदाश्रमात् इति। स्वाभिमानी याज्ञवल्क्य आचार्यस्य आज्ञां पालयन् ततोऽधीतं सर्वं त्यक्त्वा निश्चक्राम तस्मात् वैशम्पायनकुलात् ततः स वाजिरूपधरस्य भगवत आदित्यस्य प्रसादात् स्वीयेनैव तपसा अयातयामानि यजूंषि आविरभावयत्, वाजसनेयसंज्ञकाः शाखाश्च व्यभजत्।

विदेहानां सम्राट् जनकराजः कर्मकाण्डाभिरत एकदा बहुदक्षिणेन यज्ञेनायजत्। राज्ञा निमन्त्रिता ब्राह्मणाः केचन यज्ञदिदृक्षवश्च तत्राभिसंगता आसन्। मिलितं विद्वत्समाजमालोक्य जनकस्य जिज्ञासा बभूव— को नु खल्वनूचानतमो ब्रह्मिष्ठ इति। स ह गवां सहस्रमवरुरोध दशदशसुवर्णपादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः। स उवाच भो ब्राह्मणा भगवन्तः यो वो ब्रह्मिष्ठः स एता गा उदजतामिति। यदैते ब्राह्मणा न दधृषु रथ ह याज्ञवल्क्यो निजमन्तेवासिनमुवाच "हे सौम्य, उत्कालयेमा गा अस्मद्गृहान् प्रती"ति। स चान्तेवासी सामश्रवा उत्कालितवांस्ताः सर्वा गा आचार्यगृहान्प्रति। सदसि स्थिता ब्राह्मणाः क्रुद्धाः सन्तस्तमभिजग्मुः। स चापि एकैकशः सर्वान् शास्त्रीये विवादे पराबभौ। तस्य तेन महिम्ना प्रभावितो राजर्षि र्जनकस्तस्य शिष्यत्वं प्रपेदे अधिगम्य च ततो ब्रह्मविद्यां जगति जीवन्मुक्तस्य निष्कामकर्मयोगिनो राजर्षेः प्रथमां प्रसिद्धिमवाप।

समस्तेषु दृष्टानुश्रविकविषयेषु विरक्तां, मोक्षकामां पत्नीं मैत्रेयीं ब्रह्म-विद्यामुपदिश्य गृहस्थाश्रमात् प्रव्रजित आत्मारामो याज्ञवल्क्यस्तीर्थानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविचरन् एकदा भरद्वाजाश्रमं प्राप; तत्र भरद्वाजं रामचरितमुपदिदेश । तस्यैव उपदेशस्य सारेण श्रीमांस्तुलसीदासो रामचरितमानसं जग्रन्थ । भारतीयानां सर्वस्वायमानं रामचरितमानसमपि महर्षेर्याज्ञवल्क्यस्यैव महान् वर इति विषये तुलसादासमहोदयस्य रामचरितमानसान्तर्गता सत्योक्तिरेव प्रमाणमस्ति ।

ईदृशस्य महामहिमामयस्य महर्षेर्याज्ञिवल्क्यस्य अतिशायी चरितमस्माकं संस्कृतेरेकं मूलं, प्रेरणाश्रोतश्चेति वदतामस्माकं शिरांसि गौरवपरिपूरितेन राष्ट्रियगर्वेणोन्नमन्ति । धन्यो याज्ञवल्क्यः धन्या एतादृश-सत्पूत्रजननी अस्माकं नेपालभूमिः ।

कठिनाः शब्दाः

श्रोत्रियः, आनुश्रविकः, अन्तेवासी, ब्रह्मविद्या, जीवन्मुक्तः, निष्कामकर्मयोगः, अनूचानतमः, ब्रह्मिष्ठः, सुदुश्चरः अतिशायी ।

अभ्यास :

१. याज्ञवल्क्यस्य प्रसिद्धाः कृतयः काःकाः सन्ति तेषां नाम उल्लिखत ।
२. कथं याज्ञवल्क्यस्य वाचिक ब्रह्महत्यादोष ?
३. वैशम्पायन क्रुद्धो भूत्वा याज्ञवल्क्यं किमकथयत् ?
४. विदेहजनकस्य राजसभायां याज्ञवल्क्यः कथं प्रसिद्धो जातः ?
५. राज्ञो जनकस्य यज्ञसभायां याज्ञवल्क्यः कथं विद्वत्समाजं पराजिग्ये ?
६. "याज्ञवल्क्यस्य कारणात् नेपालभूमिर्धन्या अस्ति" स्वमतं लिखत ।
७. याज्ञवल्क्यः कस्माद् वेदमधीतवान् ?
८. निम्नस्थानेषूपयुक्तान् शव्दान् स्थापयत :
(क) वैशम्पायनो विधिवदुपनीय तं.................................अध्यपयामास ।
(ख) याज्ञवल्क्य आचार्यस्याज्ञां पालयन्.......................त्यक्ता निर्गतः ।
(ग) वैशम्पायनः स्वान्तेवासिभ्यः.....................आदिदेश ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिहासदीपो मानदेवः

नेपालदेवो मानदेवः अस्माकं राष्ट्रियस्य इतिहासस्य प्रोज्ज्वलो दीपः । तस्य भास्वरे यशःप्रकाशे नेपालस्य तदात्यो महिमा स्पष्टं प्रकाशते । पञ्चम-शताब्द्यां तस्मिन् नेपालभुवं शास्तरि वास्तुकलायाः मूर्तिकलायाः, साहित्यस्य, धर्मसमन्वयस्य च महतीं समृद्धिं प्रमाणयन्ति तत्समये स्थापिता उत्कीर्णाभि-लेखशिलाः ।

श्रीपशुपतिनाथ समीपवर्तिन्या वाग्मत्याः पूर्वतटस्थ त्रिगङ्गा (तिलगङ्गा) निकटे, लाजिमपाटे च त्रिविक्रमस्य भगवतो वामनस्य शिलामयमूर्ती दर्शकस्य सहसा मनो हरतः, विवेचकस्य बुद्धिं प्रभावयतः । पलानचोके भगवत्या विजय-श्रीदेव्या मूर्तिः नेपालस्य एकामनुपमां मूर्तिकलामुदाहरति । उपलब्धाः शिला-भिलेखाः तदानीन्तनं साहित्योत्कर्षं साधयन्ति । मानदेवस्य मानाङ्कमुद्रा मुद्रणशिल्पस्य, स्वतन्त्र-मुद्रा-प्रचलनस्य, तद्द्वारा वाणिज्यव्यवसायसमुन्नतेश्च पुष्टिं करोति । कालकवलीकृतोऽधुना नामावशेषो विशालो भव्यश्च मानगृहाख्यो राजप्रसादो वास्तुकलायाः समुन्नतिमनुमापयति ।

"व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः" स मानदेवः शिरसि रत्नो-ज्ज्वलमुष्णीषमाबध्य प्रविचरन् मूर्तिधारी क्षात्रोधर्म इव ददृशे । विशुद्धकाञ्च-नवपु रुदारवेषः सिंहसंहननः स युवा पश्यतां नयनानन्दजन आसीत् । सौन्दर्य-शौर्यौदार्यवैदुष्यदाक्षिण्यादिभिस्तस्य गुणैः सर्वे प्रभाविता आसन् । मातापितरौ, राजपुरुषाः, अन्याः प्रजाश्च विनयशालिनं विद्याव्यसनिनं तं दृष्ट्वा तस्य भाविनमुत्कर्षमनुममुः ।

जायमानो ह वै पुत्रः पितुर्मातुश्च ऋणवान् जायते । पालने, पोषणे;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिक्षणे दीक्षणे च यं क्लेशं मातापितरौ सहेते तस्य निष्कृतिं पुत्रः आजन्म-सेवयापि कर्तुं न शक्नोति। एतज्जानानस्य मानदेवस्य "नाम्बाऽऽनृण्यमहं तपोभिरमलैः शक्नोमि यातुं पितुः" इतीयमुक्तिः सदास्मान् पितृसेवायां प्रेरयति। पितरि धर्मदेवे स्वर्याते तमनुगमिष्यन्तीं मातरं राज्यवतीं समीक्ष्य स मानदेवः स्वयमेव पूर्वं प्राणान् हातुमुद्ययुजे। "प्राणान् पूर्वमहं त्यजामि परतस्त्वं यास्यसीतो दिवम्" इति सास्रं विलपन्तं तमुदीक्ष्य पतिप्राणापि सा पुत्रस्नेहेन राष्ट्रप्रेम्णा च पतिमनुगन्तुं नोत्सेहे। जनन्या योग्यता पुत्रं योग्यतरं करोतीति मानदेवे यथार्थं मिलति। मातुः शिक्षया, तदीय गृहनीतिसंचालनेन च मानदेवः शत्रून् मर्दयितुं, राष्ट्रमुन्नमयितुं च प्राभवत्।



मानदेवस्य राज्यारोहणसमकालमेव राष्ट्रस्य अन्तर्वैरिणः अतन्तरवैरिणश्च शिरांसि उदनमयन्। गुरोः सम्यगधिगतास्त्रशस्त्रविद्यो, राजधर्मपरायणो लिच्छविकुलशिरोमणिः स मानदेवः सैन्यबलेन नीतिबलेन च तांस्तरसा प्रमथ्य नेपालराष्ट्रं ररक्ष। मातुलसहायः स गण्डकीं तरङ्गिणीं तीर्त्वा मल्लपुरीमपि वशीचकार। दोलाद्रौ चांगुनारायणमन्दिरे तेन स्थापिते द्रपाषाणमये विजय-स्तम्भे समुत्कीर्णो लेखस्तस्य तं विजयमहिमानं वर्णयति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनन्या राज्यवत्याः पुण्यविवृध्द्यै स्थापिते वामनशिलामूर्ती तस्य मातृशक्ति निदर्शंदयतः। भोगिनीनामाङ्किता मुद्रा, गुणवतीनाम्ना, क्षेमसुन्दरीनाम्ना च स्थापिते शिवलिङ्गे विजयस्वामिनीनाम्ना स्थापिता षलानचोकभगवतीमूर्तिश्च चतसृषु महिषीषु तस्य उदाहरणीयां दक्षिणनायकतामुद्घोषयन्ति।

मानदेवस्य परिवारे शैववैष्णवशाक्तधर्माणां मनोरमः सङ्मो दृश्यते। तस्य वंशे बौद्ध–शैव–वैष्णव–शाक्तसम्प्रदायानां समन्वय आसीत्। मानदेवस्य प्रपितामहो वृषदेवः 'सुगतशासनपक्षपाती' बौद्धः, पितामहः शङ्करदेवः शैवः; पिता धर्मदेवो वैष्णवः। तस्य माता राज्यवती, पत्न्यौ गुणवतीक्षेमसुन्दर्यो विष्णुभक्तिरताः आसन्, अपरा पत्नी विजयस्वामिनी शक्त्युपासिका बभूव। स्वयं मानदेवः विष्णूपासकः चक्रमहाविहारसंस्कारकश्च अभवत्। एवं मानदेवस्य तद्वंशस्य च चरितं, सहिष्णुतास्वाभावं धर्मसमन्वयप्रवणमस्माकं राष्ट्रियं नेपालधर्मं निदर्शयति। भिन्न–भिन्न–सम्प्रदायान् यथारुचि अनुसरन्तो वयमीदृशस्य नेपालधर्मस्य भक्ता इति उच्चैर्गौरवं वहामः। धर्मत्वेन प्रयुक्त उपयुक्तश्च धर्मो मानवान् न भेदयति, अपि तु मानवता-मुत्कर्षयन्, मानवनामन्तःसंस्कारेण बहिर्जीवनंजीविके परिष्कुर्वन् मानवान् संश्लेषयति संरक्षयति च। अत्र विषये अस्माकमितिहासः साक्षी वर्तमानञ्च प्रमाणमिति।

कठिनाः शब्दाः

तदात्यः, न्यूढोरस्कः, उष्णीषम्, परिष्कुर्वन्, कालवंलीकृतः, उदारवेशः।

अभ्यासः

१. "नेपालस्येतिहासे मानदेवस्योज्ज्वलः प्रकाशो भाति" अस्य कारणं उल्लेख्यम्।

२. मानदेवस्य पितरि कीदृशी भक्तिरासीत्?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. "राजनीतावपि स कुशल आसीत्" इत्युक्तिः सप्रमाणं समर्थयत ।

४. "मानदेवस्य वंशे" वौद्ध-शैव-वैष्णव-शाक्त सम्प्रदायानां समन्वय आसीत्" इत्यस्य सप्रमाणं पुष्टि कुरुत ।

५. अधो लिखित शब्देषु मानदेवस्य संवन्धं दर्शयत–

(क) मानाङ्क। (ख) त्रिविक्रमस्य भगवतो वामनस्य शिलामयमूर्ती ।
(ग) विजयश्रीदेव्या मूर्तिः । (घ) राज्यवती । (ङ) धर्मदेवः ।
(च) शङ्करदेवः । (छ) वृषदेवः । (ज) विजयस्वामिनी । (झ) गुणवती ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवभूतिः

पुरा विदर्भ (वरार) प्रान्ते पद्मपुरनगरे श्रौतस्मार्तकर्मनिष्णाताः काश्यपगोत्रजा उदुम्बरनामका विप्रा आसन् । तेषु श्रीभट्टगोपालो नाम महाकविरासीत् । एतस्य पौत्रो नीलकण्ठाभिधः पण्डितोऽभूत् । अस्य विदुषः पत्नी जतुकर्णी अनयोः सुपुत्रः श्रीकण्ठपदाभिधानान्तरो भवभूतिः संस्कृतसाहित्ये विभूति संजातः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामीमांसकात् कुमारिलभट्टात् सर्वशास्त्राणि स प्राप। स कवि विक्रमस्याष्टम्यां शताब्द्यां राज्ञो यशोवर्म्मणः सभापण्डित आसीत्। यशोवर्माणं विजित्य श्रीललितादित्यो भवभूतिं स्वदेशं काश्मीरमनैषीत्। "साम्बा पुनातु भवभूतिपवित्रमूर्तिः" अथवा "गिरिजाया स्तनौ वन्दे भवभूतिसिताननौ" इत्यत्र भवभूतिशब्दप्रदर्शनात् कवेः भवभूतिरिति नाम संजज्ञे इत्यस्ति पण्डितपरम्परा-गता प्रसिद्धिः।

असौ महाकविरेव नासीत् मीमांसकधुर्यश्चाभूत्। अस्य नामान्तर मुम्बेक इति च वदन्ति विद्वांसः। अनेन श्लोकवार्तिके व्याख्या च व्यधायि। अस्य प्रसिद्धिरधुना नाटके सर्वैज्ञयिते।

कविः समाजस्य स्वरूपं सर्वेषां पुरतः स्थापयति नाटके। रसानुबोधेन समाजानुनयनं कवयः कुर्वन्ति। तस्मादेवाकथयन् प्राचार्याः 'नाटकान्तानि काव्यानि' इति। महति दुष्करेऽस्मिन् कार्ये भवभूतिः सिद्धहस्तोऽभूत्।

वैक्रम्यामष्टमशताब्द्यां समाजस्यावस्था कीदृशी आसीदिति। मालती-माधव नाटकस्याध्ययनेन परिज्ञायते। तस्मिन् नाटके कवेः समाजं प्रति विद्रोहः परिदृश्यते। मौलिके सामाजिके नाटकेऽस्मिन् वृद्धिविवाहस्योपहासं, पाखण्ड-धर्मस्य विनाशं सत्यप्रणयस्य विजयं च कविः प्रतिपादयति। तदीयेऽस्मिन्ना-टके वैक्रम्यामष्टम्यां शताब्द्यां भारतवर्षस्य तदन्हीन्तनः समाजः सुरक्षितोऽस्ति।

तथैव महावीरचरिताख्ये नाटके वीररसस्य, उतररामचरिते करुणरसस्य मालतीमाधवे श्रृङ्गाररसस्य च स्थापना विहितानेन महाकविना। इतः प्राक् वीरश्रृङ्गाररसावेव नाटकस्य प्रधान रसावास्ताम्। एको रसः करुण एवेति अस्य कवेस्वसिद्धान्तमस्थापयत् महाभाग एषः। बहवो विरोधिन आसन् परन्तु न हि विरमति तथापि भवभूतिमतिः स्वकृत्यात्। तस्य बलवती आशा पुरतः प्रोत्साहयति। सत्यमाह स महाकविः—

उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा।
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कठिनाः शब्दाः

निरवधिः, मीमांसकः, निष्णातः, समानधर्मा,

अभ्यासः

१. "भवभूतिः" इत्यस्य नाम्नः पृष्टभूमि निदर्शयत ।

२. "नाटकान्तानि काव्यानि" अस्याशयं श्पष्टं कुरुत ।

३. 'करुण रसस्यापि नाटकस्य मुख्यरसत्वन स्थापनाऽनेन विहिता' अस्य प्रमाणं दर्शयत ।

४. भवभूतेः गुरोः मातुः पितुः प्रपितामहस्य च नामोल्लेखं कुरुत

५. रिक्त स्थानानि पूरयत

(क) भवभूतेः समयः....................

(ख) ललितादित्यः.....................

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूतवाक्यम्-महाकविर्भासः



(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः— पादः पायादुपेन्द्रस्य सर्वलोकोत्सवः स वः ।
व्याविद्धो नमुचिर्येन तनुताम्रनखेन खे ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमार्यमिश्रान् विज्ञापयामि । अये ! किं नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते अङ्ग ! पश्यामि ।

(नेपथ्ये)

भो भोः प्रतीहाराधिकृताः महाराजो दुर्योधनः समाज्ञापयति ।

सूत्रधारः— उत्पन्ने धार्तराष्ट्राणां विरोधे पाण्डवैः सह
मन्त्रशालां रचयति भृत्यो दुर्योधनाज्ञया ।

(निष्क्रान्तः)

स्थापना

(ततः प्रविशति दुर्योधनः)

काञ्चुकीयः— जयतु महराजः । महाराजशासनात् समानीतं सर्वराजमण्डलम् ।

दुर्योधनः— सम्यक् कृतम् । प्रविश त्वमवरोधनम् ।

काञ्चुकीयः— यदाज्ञापयति महराजः (निष्क्रान्तः)
(सभासद आगछन्ति)

दुर्योधनः— आचार्य ! एतत् कूर्मासनम् आस्यताम् । पितामह ! एतत् सिंहासनम् आस्यताम् ! मातुल ! एतच्चर्मासनम् आस्यताम् । वैकर्णवर्षदेवौ ! आसातां भवन्तौ । भो भोः सर्वक्षत्रियाः ! स्वैरमासतां भवन्तः । नन्वयमहमासे । वयस्य कर्ण ! त्वमप्यास्स्व (उपविशति)

(प्रविश्य)

काञ्चुकीयः—जयतु महाराजः । एष खलु पाण्डवस्कन्धावाराद् दौत्येनागतः पुरुषोत्तमो नारायणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्योधनः— मा तावद्, भो वादरायण! किं किं कंसभृत्यो दामोदरस्तव पुरुषोत्तमः? स गोपालकस्तव पुरुषोत्तमः? जरासन्धापहृत-विषयकीर्तिभोगस्तव पुरुषोत्तमः? आः अपध्वंस।

काञ्चुकीयः—प्रसीदतु महाराजः। सम्भ्रमेण समुदाचारो विस्मृतः।

दुर्योधनः— संभ्रम इति। आः मनुष्याणामस्त्येव संभ्रमः। उत्तिष्ठोत्तिष्ठ।

काञ्चुकीयः—अनुगृहीतोऽस्मि।

दुर्योधनः— इदानी प्रसन्नोऽस्मि। क एष दूतः प्राप्तः?

काञ्चुकीयः—दूतः प्राप्तः केशवः।

दुर्योधनः— केशव इति। एवमेष्टव्यम्। अयमेव समुदाचारः। आनीयतां स विहगवाहनमात्रविस्मितो दूतः।

काञ्चुकीयः— यदाज्ञापयति महाराजः। (निंष्क्रान्तः)

दुर्योधनः— योऽत्र केशवस्य प्रत्युत्थास्यति, स मया द्वादशसुवर्णभारेण दण्ड्यः। अहमपि इदमालिखितद्रौपदीकेशाम्बरापकर्षणं चित्रपटं पश्यंस्तिष्ठामि।

(ततः प्रविशति वासुदेवः काञ्चुकीयश्च)
(सर्वे सभासदः सम्भ्रान्ता भवन्ति।)

वासुदेवः— अलमलं सम्भ्रमेण।

दुर्योधनः— अलमलं सम्भ्रमेण। स्मरणीयः पूर्वमाश्रावितो दण्डः।

वासुदेवः— भोः दुर्योधन! किमास्से?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्योधनः— (सम्भ्रमेणासनात् पतित्वा उत्थाय आत्मगतम्) अहो ! बहुमा-
योऽयं दूतः (प्रकाशम्) ! भो दूत एतदासनमास्यताम् ।

वासुदेवः— आचार्य ! आस्यताम् । गाङ्गेयप्रमुखा राजानः स्वैरमासतां
भवन्तः । वयमप्युपविशामः (उपविश्य चित्रपटमापाततो
विलोक्य) अहो ! दर्शनीयोऽयं चित्रपटः (निरीक्ष्य) मा तावत् ।
द्रौपदीकेशधर्षणमत्रालिखितम् । अपनीयतामेष चित्रपटः ।

दुर्योधनः— (ससम्भ्रमम्) काञ्चुकीय, अपनीयतामेष चित्रपटः (काञ्चु-
कीयः चित्रपटमपनयति) भो दूत ! कुशलिनः पाण्डवा ?

वासुदेवः— कुशलिनः सर्वे । भवतः कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति
पाण्डवाः "अनुभूतं महद्दुःखं सम्पूर्णः समयः स वै ।
अस्माकमपि धर्म्यं यद् दायाद्यं तद् विभज्यताम् ।" इति

दुर्योधनः— कथं ? कथं ? दायाद्यमिति ? पितृभुक्तमिदं मे राज्यम् । तृणमपि
न दास्ये ।

वासुदेवः— भो ! कुरुकुलकलङ्कभूत, अयशोलुब्ध, वयं किल तृणान्तराऽभि-
भाषकाः ?

दुर्योधनः— भो गोपालक ! सत्यं तृणान्तराभिभाष्यस्त्वम् ।

वासुदेवः— भो ! सुयोधन, क्षिपसि माम् ?

दुर्योधनः— आ अभाष्यस्त्वम् ।
अहमवधृतपाण्डरातपत्रो द्विजवरहस्तधृताम्बुसिक्तमूर्धा
अवनतनृपमण्डलानुयात्रैः सह कथयामि भवद्विधै र्न भाषे ।

वासुदेवः— न व्याहरति किल मां सुयोधनः । भोः !
शठ, बान्धवनिःस्नेह, काक, केकर, पिङ्गल,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदर्थात् कुरूवंशोऽयचिरान्नाशमेष्यति ।
भो भो, राजानः ! गच्छामस्तावत् ।

दुर्योधनः— कथं यास्यति किल केशवः । दुःशासन, दुर्मर्षण, दुर्मुख, दुष्टेश्वर, दूतसमुदाचारमतिक्रान्तः केशवोऽयं बध्यताम् । किं न समर्थाः स्थ । भवतु अहमेव बध्नामि । (उपसर्पति)

वासुदेवः— कथं बध्दुकामो मां सुयोधनः । भवतु, सुयोधनस्य सामर्थ्यं पश्यामि । (विश्वरूपमास्थितः)

दुर्योधनः— आः तिष्ठेदानीम् । कथं न दृष्टः केशवः ? अयं केशवः, अहो ह्रस्वत्वं केशवस्य ! आः निष्ठेदानींम् । कथं न दृष्ट केशवः । अहो दीर्घत्वं केशवस्य ! कथं न दृष्टः केशवः । अयं केशवः । सर्वत्र मन्त्रशालायां केशवा भवन्ति । किमिदानीं करिष्ये । भवतु दृष्टम् । भो भो राजानः एकेनैकः केशवो बध्यताम् । कथं स्वयमेव वद्धाः पतन्ति राजानः । भवतु रणक्षेत्रे मम विक्रमं द्रक्ष्यसि । (इति जवान्निष्क्रान्तः)

वासुदेवः— अपक्रान्तो दुष्टः । भवतु अहमपि पण्डवशिविरमेव यास्यामि ।

(नेपथ्ये)

न खलु न खलु गन्तव्यम् ।

वासुदेवः— अये ! वृद्धराजस्वर इव । भो राजन् ! एष स्थितोऽस्मि । (ततः प्रविशति धृतराष्ट्रः)

धृतराष्ट्रः— क्व नु खलु भगवान् नारायणः ? क्व नु खलु भगवान् विप्रप्रियः ? क्व नु खलु भगवान् देवकीनन्दनः ?
मम पुत्रापराधात् तु शार्ङ्गपाणे तवाधुना
एतन्मे त्रिदशाध्यक्ष, पादयोः पतितं शिरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांसुदेव;– हा धिक् ! पतितोऽत्र भवान् (उत्थापयन्) उत्तिष्ठोत्तिष्ठ महाराज !

धृतराष्ट्रः– अनुगृहीतोऽस्मि । इदं पाद्यमर्घ्यं च प्रतिगृह्यताम् ।

वासुदेवः– सर्वं गृहणामि । किं ते भूयः प्रियमुपहरामि ।

धृतराष्ट्रः– यदि मे भगवान् प्रसन्नः किमतः परमिच्छामि ।

(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंह : प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

(संक्षेपितम्)

कठिनाः शब्दाः

नान्दी, सूत्राधारः नेपथ्यम्, समुदाचारः, तृषान्तरामिभाषकाः, आपाततः, स्कन्धावाटः ।

अभ्यास :

१. दुर्योधनः कथं श्रीकृष्णस्य स्वागतमकरोत् ?
२. श्रीकृष्णो दूतो भूत्वा दुर्योधनं किमुवाच ?
३. केशवेन दुर्योधनस्य गर्वः कथं चूर्णीकृतः ?
४. दुर्योधनस्य सभायां सर्वे सभासदः कस्य पक्षे आसम् ?
५. धृतराष्ट्रः किमर्थं श्रीकृष्णस्य अनुनयमकरोत् ?
६. दूतवाक्यमिदं कस्य कृतिः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदर्थात् कुरुवंशोऽयचिरान्नाशमेष्यति ।
भो भो, राजानः ! गच्छामस्तावत् ।

दुर्योधनः— कथं यास्यति किल केशवः । दुःशासन, दुर्मर्षण, दुर्मुख, दुष्टेश्वर, दूतसमुदाचारमतिक्रान्तः केशवोऽयं बध्यताम् । किं न समर्थाः स्थ । भवतु अहमेव बध्नामि । (उपसर्पति)

वासुदेवः— कथं बध्दुकामो मां सुयोधनः । भवतु, सुयोधनस्य सामर्थ्यं पश्यामि । (विश्वरूपमास्थितः)

दुर्योधनः— आः तिष्ठेदानीम् । कथं न दृष्टः केशवः ? अयं केशवः, अहो ह्रस्वत्वं केशवस्य ! आः निष्ठेदानींम् । कथं न दृष्ट केशवः । अहो दीर्घत्वं केशवस्य ! कथं न दृष्टः केशवः । अयं केशवः । सर्वत्र मन्त्रशालायां केशवा भवन्ति । किमिदानीं करिष्ये । भवतु दृष्टम् । भो भो राजानः एकेनैकः केशवो बध्यताम् । कथं स्वयमेव वद्धाः पतन्ति राजानः । भवतु रणक्षेत्रे मम विक्रमं द्रक्ष्यसि । (इति जवान्निष्क्रान्तः)

वासुदेवः— अपक्रान्तो दुष्टः । भवतु अहमपि पण्डवशिविरमेव यास्यामि ।

(नेपथ्ये)

न खलु न खलु गन्तव्यम् ।

वासुदेवः— अये ! वृद्धराजस्वर इव । भो राजन् ! एष स्थितोऽस्मि । (ततः प्रविशति धृतराष्ट्रः)

धृतराष्ट्रः— क्व नु खलु भगवान् नारायणः ? क्व नु खलु भगवान् विप्रप्रियः ? क्व नु खलु भगवान् देवकीनन्दनः ?
मम पुत्रापराधात् तु शार्ङ्गपाणे तवाधुना
एतन्मे त्रिदशाध्यक्ष, पादयोः पतितं शिरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांसुदेव;– हा धिक् ! पतितोऽत्र भवान् (उत्थापयन्) उत्तिष्ठोत्तिष्ठ महाराज !

धृतराष्ट्रः– अनुगृहीतोऽस्मि । इदं पाद्यमर्घ्यं च प्रतिगृह्यताम् ।

वासुदेवः– सर्वं गृहणामि । किं ते भूयः प्रियमुपहरामि ।

धृतराष्ट्रः– यदि मे भगवान् प्रसन्नः किमतः परमिच्छामि ।

(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंह : प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

(संक्षेपितम्)

कठिनाः शब्दाः

नान्दी, सूत्राधारः नेपथ्यम्, समुदाचारः, तृषान्तरामिभाषकाः, आपाततः, स्कन्धावाटः ।

अभ्यास :

१. दुर्योधनः कथं श्रीकृष्णस्य स्वागतमकरोत् ?
२. श्रीकृष्णो दूतो भूत्वा दुर्योधनं किमुवाच ?
३. केशवेन दुर्योधनस्य गर्वः कथं चूर्णीकृतः ?
४. दुर्योधनस्य सभायां सर्वे सभासदः कस्य पक्षे आसन् ?
५. धृतराष्ट्रः किमर्थं श्रीकृष्णस्य अनुनयमकरोत् ?
६. दूतवाक्यमिदं कस्य कृतिः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिक्षा समस्या

(कपाटमुदघाटय माया प्रविशति)

माया. (दुरादेवावनतेन मुर्द्धा प्रणमति) वन्दे ।

मुरारि. (आसनं निर्दिश्य) इदमासनमास्यताम् ।

माया. (लम्वपटस्थप्रान्ते वसति) (संस्मृत्य) रोगस्तु अपागत इवेति-विचारयामि ।

चन्द्रचूडः स्यात् ।

मुरारि. माये, बी. ए. परिक्षाया मुत्तीर्य कित्वया । व्यवसीयते ?

माया. नजाने, पिता कस्मिन् कर्मणि नियोजयति

मुरारिः एताःखलु अधिकरणस्थानं समलंकृत्य तस्मात् पुरूषवर्ग गलहस्त-यन्ति । सर्वाः स्त्रियः पुरुषायितुमिच्छन्ति ।

(हसति)

मायाः (सखेदम्) स्त्रीणमिमामवस्थां विलोक्य किं वीद्वांसो विहसन्ति नराणां नार्थ एव मातरः मातृदेवो भवेति भगवती श्रुतिरुपदिशति । मातृजातिं नियन्त्र्य केनामि राष्ट्रेण महद् गौरवं नासादितम् ।

चन्द्रचूड़ः कुलकुमारि सत्यमेव जटिला समस्या । पाश्चात्यदेशे विपमा समस्या समुत्पन्ना इति श्रूयते । तथैवात्रापि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायाः महत्यां दुरवस्थायां वयं स्मः । स्त्रीणां किं लक्ष्यं तन्निर्धारणीयम् ।
मुरारिः कैर्निर्धार्यते ?

चन्द्रचूडः माये ! नारिभिरेव निर्धारणीया स्वविषया ।

माया पञ्चदशवर्षात् प्राग्रेवोपयच्छ्यत् । का विचारयतु ।

चन्द्रचूडः (संस्मृत्य) आङ्लभाषा अस्माकं स्वार्थं न साधयति ।

मुरारिः भद्र । स्त्रीशिक्षा कया रित्या स्वसंस्कृतिहिता भवति । एतत् कैरपि न विचारितम् ।

चन्द्रचूडः मेकालस्य दूरदर्शिता सफलीभूता । सिद्धस्तस्य मनोरथः ।
माया कथमिव ?

चन्द्रचूडः एतादृशीं परीक्षाप्रणालीं निर्माय आङ्गलभाषाया महत्त्वं विधाय परीक्षामुद्रालयात् समानाकारा एकपरिमाणा मुद्रा इव स्नातकास्तेन समुत्पादिताः अप्राप्तकृत्तयस्ते सर्वे परतन्त्रीभूय सर्वकारस्याधिकरणे स्थानं समीहन्ते स्वानुकूलं शासनं चालयितुं तान कर्मकराः स्थाने यन्त्रवत् प्रयुज्यते !

माया (सवितर्कम्) यदि परीक्षा न भवेत् योग्यता कथमवबुध्येत । सर्वत्र परीक्षा-प्रणाली प्रचलितास्ति ।

मुरारिः सत्यम् । किन्छात्र सा कीदृशी विद्यते ततः कीदृशा विद्वांसः संजायन्ते विचारणीयोऽयंविषयः । इङ्गल्याण्डदेशे आङ्गलै स्वराष्ट्रभाषायां शिक्षा प्राप्यते ।

चन्द्रचूडः क्षुब्धं वातावरणं विलोक्य मनसि महती आशा समुदेति ।
माया अर्थशास्त्रस्य राजशास्त्रस्य तथा विज्ञानस्यापि ग्रन्था भारतीय वाङ्मये न विद्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिक्षा समस्या

(कपाटमुदघाटय माया प्रविशति)

माया. (दुरादेवावनतेन मुर्द्धा प्रणमति) वन्दे ।

मुरारि. (आसनं निर्दिश्य) इदमासनमास्यताम् ।

माया. (लम्बपटस्थप्रान्ते वसति) (संस्मृत्य) रोगस्तु अपागत इवेति-विचारयामि ।

चन्द्रचूडः स्यात् ।

मुरारि. माये, बी. ए. परिक्षाया मुत्तीर्य किंत्वया । व्यवसीयते ?

माया. नजाने, पिता कस्मिन् कर्मणि नियोजयति

मुरारिः एताःखलु अधिकरणस्थानं समलंकृत्य तस्मात् पुरूषवर्ग गलहस्त-यन्ति । सर्वाः स्त्रियः पुरुषायितुमिच्छन्ति ।

(हसति)

मायाः (सखेदम्) स्त्रीणमिमामवस्थां विलोक्य किं वीद्वांसो विहसन्ति नराणां नार्थ एव मातरः मातृदेवो भवेति भगवती श्रुतिरुपदिशति । मातृजातिं नियन्त्र्य केनामि राष्ट्रेण महद् गौरवं नासादितम् ।

चन्द्रचूड़ः कुलकुमारि सत्यमेव जटिला समस्या । पाश्चात्यदेशे विषमा समस्या समुत्पन्ना इति श्रूयते । तथैवात्रापि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायाः महत्यां दुरवस्थायां वयं स्मः । स्त्रीणां किं लक्ष्यं तन्निर्धारणीयम् ।
मुरारिः कैर्निर्धार्यते ?

चन्द्रचूडः माये ! नारिभिरेव निर्धारणीया स्वविषया ।

माया पञ्चदशवर्षात् प्राग्रेवोपयच्छ्यत् । का विचारयतु ।

चन्द्रचूडः (संस्मृत्य) आङ्लभाषा अस्माकं स्वार्थं न साधयति ।

मुरारिः भद्र । स्त्रीशिक्षा कया रित्या स्वसंस्कृतिहिता भवति । एतत् कैरपि न विचारितम् ।

चन्द्रचूडः मेकालस्य दूरदर्शिता सफलीभूता । सिद्धस्तस्य मनोरथः ।
माया कथमिव ?

चन्द्रचूडः एताद्दशीं परीक्षाप्रणालीं निर्माय आङ्गलभाषाया महत्त्वं विधाय परीक्षामुद्रालयात् समानाकारा एकपरिमाणा मुद्रा इव स्नातकास्तेन समुत्पादिताः अप्राप्तकृत्तयस्ते सर्वे परतन्त्रीभूय सर्व. कारस्याधिकरणे स्थानं समीहन्ते स्वानुकूलं शासनं चालयितुं तान कर्मकराः स्थाने यन्त्रवत् प्रयुज्यते !

माया (सवितर्कम्) यदि परीक्षा न भवेत् योग्यता कथमवबुध्येत । सर्वत्र परीक्षा-प्रणाली प्रचलितास्ति ।

मुरारिः सत्यम् । किञ्छात्र सा कीदृशी विद्यते ततः कीदृशा विद्वांसः संजायन्ते विचारणीयोऽयंविषयः । इङ्गल्याण्डदेशे आङ्गलै स्वराष्ट्रभाषायां शिक्षा प्राप्यते ।

चन्द्रचूडः क्षुब्धं वातावरणं विलोक्य मनसि महती आशा समुदेति ।
माया अर्थशास्त्रस्य राजशास्त्रस्य तथा विज्ञानस्यापि ग्रन्था भारतीय वाङ्मये न विद्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुरारिः विज्ञानप्रकास-चाकचक्यात् भ्रान्त्या तेष्वधित्कं मन्धविश्वासं कृत्वा स्वविवेकशक्तिं त्यजन्ति जनाः ।

चन्द्रचूडः विज्ञाने समुन्नतदेश वैज्ञानिकैः सह वयं स्पर्ध्यं कर्तुं न सक्नुमः । किन्तु विज्ञानमेकेनैन देशेन स्वायतीकृतं न हि । यदि अन्यदेशियैरविष्कृतं विज्ञानं स्वभाषसु आङ्गलैरनुद्य स्थापयते चेत् । स एव मार्गोऽस्माभिरनुसरणीयः ।

माया कुत्र प्राप्यते धनं तथाकर्तुम् ।

चन्द्रचूडः सप्तदशवर्षेभ्यः पूर्वं यदि रूसस्तथैवाऽऽशङ्केत तदा तस्या वाङ्मये परमाण्वस्त्र निर्माण-प्रक्रियायाः पुस्तकं कथं सम्पद्येत (सगर्वम्) अस्माकं समीपे द्रव्यस्य न्युनता नास्ति ।

मुरारिः पञ्चकोटि संख्यकाः फ्रान्सीयाः सर्वोच्च वाङ्मयं स्वभाषायां संपादयन्ति चेद् वयं कथं तूष्णीं निवसम ! परमर्षिभि स्तपस्तप्त्वा आराधिता देववाणी स्वतन्त्रदेशे कथं लुप्येत यस्याममरभारत्यामस्मत्पूर्वजानां मस्तिष्कसर्वस्वं वर्तते ।

माया (सप्रणयं स्वगतम्) किमर्थमद्यमे हृदयं मनोविकारं मापद्यते ! कथमिव क्रिमिव कलयामि ।

चन्द्रचूडः (स्वगतम्) प्रथमदर्शनादारभ्य वयुत्सुक इवास्मि (प्रकाशम्) सेवाधर्मे शरीरं कथं रहयसि !

माया (सकटाक्षपातम्) सेवासुखमार्दयति मे हृदयम् ।

मुरारिः वाढम् । समाजे जाता वयम् ।

चन्द्रचूडः (सस्नेहम्) वत्से किं कुर्वीय लोको मामभ्यर्थयते ।
(माया घटीयन्त्रं विलोक्य समुत्थाय परावृत्य सानुरागं चन्द्रचूडं विलोक्य प्रणम्य च गच्छति) (जवनिका पतति)

(परिणामं नाटकात्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कठिनाः शब्दाः –

व्यवसीयते, नियन्त्र्य, उपयच्छ्येत, अवबुध्येत, जवनिका कपाटम् ।

अभ्यासः

१. कथं शिक्षा समस्या समुत्पन्ना ?

२. मायाया विचारं स्पष्टीकुरुत ।

३. 'आङ्लभाषा अस्माकं स्वार्थं न साधयति' कथम ?

४. विज्ञान शिक्षाप्राप्तये को मार्गोऽअनुसरणीयः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्राय पितुः पत्रम्

स्वस्ति यज्ञशरणात् सेनापतिः पुष्पमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात् परिष्वज्येदमनुदर्शयति । विदितमस्तु, योऽसौ राजयज्ञदीक्षितेन मया राजपूत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य वत्सरोपान्तनियमो निरर्गलस्तुरङ्गमो विसृष्टः । स सिन्धो रोधसि चरन्नश्वानीकेन यवनेन प्रार्थितः । तत उभयोः सेनयोर्महानासोत् संमर्दः । धन्विना वसुमित्रेण परान् पराजित्य प्रसह्य ह्नियमाणो मे वाजिराजो निर्वर्तितः ।

सोऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा बधूजनेन सह यज्ञसेवनायागन्तव्यमिति ।

.........वत्सरे......मासे......दिने.......वारे इतिशुभम्

महाकविः कालिदासः
(मालविकाग्निमित्रनाटके)

अभ्यास :

१. पुष्पमित्रेण स्वपुत्रमग्निमित्रं उपर्युल्लिखितपत्रे किं लिखितमस्ति तत् सरलभाषया संक्षेपेण च उल्लेखयत ।
२. पित्रे स्वपाठशालाया वर्णनं कुर्वन्नेकं पत्रं लिख ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवेदन-पत्रम्

श्रीमत्सु प्रधानाध्यापकमहोदयेषु
सविनयं निवेदनम् ।

अहमिदानीं बलवता रोगेणाक्रान्तोऽस्मि दशभिर्दिनैः शय्यामधिशयानो विद्ये । अतः पाठशालायामुपस्थीतुं न शक्नोमि । पञ्चदशदिनान्यवसर-लब्धये निवेदयामि । भिषजादत्तं प्रमाणपत्रमपि संलग्नं विद्यते । उपस्थिति-पत्रिकायां रुग्ण इति ज्ञापयितुं सविनयं प्रार्थये । आशासेऽनुगृहीतो भवेय-मिति ।

वशंवदस्य
अष्टमकक्षावर्तिनः छात्रस्य
देवदत्त शर्मणः

स्थानम्—
देवपत्तनम्, नेपालः
. . . . दिने

अभ्यासः

१. विदेशे अध्ययनार्थं गतं सखायं प्रति पठनार्थं स्वदेशमागन्तुं निमंत्रणपत्रमेकं प्रेषणीयम् ।
२. कस्यापि रमणीयस्थानस्य वर्णनं कुर्वतैकं पत्रं 'चित्रवन' वासिने मित्राय लेखनीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृतान्त-पत्रम्

प्रिय मित्रवर,

अत्र नूतना शिक्षानीतिः प्रचलिता । नवीनां नीतिं समवलम्व्य सर्वं-कारः लोकहिताय जागर्ति । दासवृत्तिमूला शिक्षा समाप्तप्राया विद्यते । अमेरिकादेशवासिनः वैज्ञानिकाश्चन्द्रलोकं गत्वा प्रतिनिवर्तन्ते, वयमज्ञानोपहता दरिद्रा एकस्मादञ्चलादञ्चलान्तरं गन्तुमपि असमर्थाः स्मः । अतो वैज्ञानिकी शिक्षा स्वीकरणीयाऽस्माभिः ।

बहोः कालात् भवत्पत्रमनवाप्य चिन्तितोऽस्मि । किञ्च, अस्मद्देशे सञ्चार व्यवस्थापि राजमार्गस्यापूर्णतया त्रुटिपूर्णा एव । भवानपि यद्यत्रोप-स्थितश्चेत् राष्ट्रनिर्माणकर्मणि योगं दातुं समर्थः स्यात् । अत्र कुशलमस्ति, तत्रापि क्षेमं समीहे । पत्रस्योत्तरप्रदानेनानुग्राह्योऽयं जनः । भवद्गृहेऽपि सर्वे परिवारा कुशलिनो विद्यन्ते । अचिरेण भवत्समागमसुखं लभेयत्याशासे ।

स्थानम्—

समयः—

अभिन्नहृदयः सुहृत्

सुरेशः

अभ्यास :

१. सकारणं दिनस्यैकस्यावकाशं प्रार्थयन् प्रधानाध्यापकमहोदयं प्रति पत्रं लिखत ।
२. शैक्षिकभ्रमणाय व्यवस्थां कर्तुं विद्यार्थिसमूहस्य प्रतिनिधिर्भूत्वा प्रधानाध्यापकाय अनुरोधपत्रं लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौः



गौरस्माकं राष्ट्रियः पशुः । सर्वत्रास्मिन्देशे तथा भूमण्डलस्यान्येषु देशेषु प्रदेशेषु च प्राप्यतेऽयं पशुः । गौरेकः चतुष्पात् पशुरस्ति । अस्या आकृतिः सरला मुग्धा च भवति । अमृतमयं दुग्धं ददातीयं गौः । तृणं चरतीयम् । अन्नं ग्रासादिकं चास्या भोजनम् । अस्या वत्सा वृषा भूत्वा हलेषु शकटीषु शकटेषु च प्रयुज्यन्ते । आकृतौ वर्णे च विभिन्नप्रकारा दृश्यन्ते गावः पर्वतप्रान्तीयाः गावो ह्रस्वाकारास्तथा स्वल्पदुग्धदाश्च भवन्ति । समतलप्रदेशेंषु च बृहदाकाराः स्थूलाः तृणान्न कार्पासबीज-खल्यादि स्निग्धप्रायभोजनाः पर्याप्तदुग्धप्रदाश्च भवन्ति । वर्णतश्च कृष्णाः कपिलाः श्वेता रक्ताः पीताः कर्बू राश्चेति नैकविधाः । वृषाश्चापि ह्रस्वाकृतयो विशालाकाराः स्थूला कृशाङ्गाः महाशृङ्गाः लघुशृङ्गाः कृष्णाः कपिलाः श्वेताः रक्ताः पीताः कर्बु राश्चेत्यनेकप्रकाराः । कृषिप्रधानस्य देशस्य तु सर्वस्वं गाव एव । अत्र किमस्ति वस्तु यद् गवामेव कृपया नोत्पन्नं स्यात् । सर्वप्रथमं जीवनौषधिरूपमन्नमेव गृह्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताम्—गोजाता वृषा हलैर्भूमिं कर्षयन्ति उर्वरां कुर्वन्ति, तैरेवोप्यन्ते क्षेत्राणि। संपन्नं परिपक्वं च तत्सस्यं पूनस्तैरेव संशोध्यते, गृहं प्रत्यानीयते च समतल प्रदेशेषु। को वाऽस्ति मानवो जगति योऽन्नं वस्त्रं वा विना जीवितुमपि शक्नुयात्। तदुभयमिदमस्माभिः गवामेव कृपया लभ्यते।

अन्नाद् व्यतिरिक्तं मानवजीवनोपयोगि सर्वमन्यदपि गाव एव प्रयच्छन्ति। जातमात्रस्य हि शिशोर्मातृस्तन्यादतिरिक्तं गोदुग्धमेव प्राथमिकं भोजनम्, येन स प्राप्नोति शारीरिकीं पुष्टिम्। अथान्नभक्षणयोग्यो भूत्वापि अन्नैः सार्धं परमापेक्षितान् दुग्ध-दधि-घृतादीन् स्निग्धपदार्थान् लभते खलु गवामेवानुकम्पया। नास्ति मानवजीवनस्य कोऽपि भागो यत्र गोभिरुपकारो न विधीयते। सत्यं चेदं वचः कस्यापि महापुरूषस्य—"गावः प्रतिष्ठा भूतानाम्" इति।

यथा माता पुत्रं सर्वतो रक्षति, पालयति, प्रीणयति, सर्वदा तस्मिन्, स्निह्यति, न च कदापि विरज्यते पुत्रात्, तथा गौरपि मानवान् पालयति प्रीणयति, दुग्धादिना संवर्धयति च। भर्त्सिता ताडिताऽपि न विरज्यते, सदा सुखमेव साधयति मानव-संसारस्य। अतएव "गावो विश्वस्य मातरः" इत्युच्यन्ते। गाव एव च ऐहिलौकिक-पारलौकिक-श्रेयः साधनीभूतस्य धर्मस्य सर्वप्रधानमङ्गम्। गव्यैरेव पदार्थैः सम्पद्यते यज्ञः, गवामेव च दुग्ध-दधि-घृतादिभिः सम्पन्नेन पञ्चामृतेन भवति पूजनं देवतानाम्! प्रायश्चित्तेषु चान्तर्वहिः शुद्धिमभीप्सुभिरुपयुज्यते गवामेव पयो-दधि-घृत-मूत्र-गोमयमयं पञ्चगव्यम्। इदमन्तःकरणमलानां कामक्रोधादीनां शारीरिकाणाञ्च धातु-वैषम्यजनितानामतिदूषितानामपि रोगाणां परमं शोधकं निवारकञ्चास्ति सत्यमिदमुच्यते "गावः स्वस्त्ययनं महत्"।

वेदेषु गोविषये उल्लिखितं प्राप्यते यत इयं गौरघ्न्या इति। अस्मिन् हिन्दूराष्ट्रे नेपाले गोवधः सर्वथा निषिद्धोऽस्ति। हिन्दूजनानां तु सर्वथा पूज्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माता इवास्ति गौः अतोऽस्माभिः सर्वथा गावो रक्षणीयाः, पालनीयाः, संवर्धनीयाश्चेति ।

अभ्यास :

१. कतिप्रकाराः गावो दृष्टाः त्वया ? तेषां प्रकारान् दर्शय ।
२. गोरुपयोगितायाः सकारणं पञ्चहेतवः उल्लिख्यन्ताम् ।
३. गव्यैः पदार्थैः कतिप्रकाराणि मिष्ठान्नानि निर्मीयन्ते ?
४. गौः राष्ट्रीयः पशुरिति भण्यतेऽस्य कारणं किं भवेत् ?
५. गोवधः किं निषिद्धोऽस्मद्देशे स्पष्टम् उल्लेखनीयम् ।
६. निम्नलिखितविषयेषु निबन्धान् रचयत–
वृषः, कुक्कुरः, अश्वः, इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शारदोत्सवः (दशैं)

आश्विनकृष्णाऽमावास्यातः पूर्णिमापर्यन्तं शारदोत्सवो विधीयते, विशेषतो नेपालाभिजनैः। नेपालीया यस्मिन् कस्मिन्नपि राष्ट्रे निवसन्तो धनिनो निर्धना आस्तिका नास्तिकाश्च निजं सांस्कृतिकं महोत्सवमिमं समानरूपेण हृदयतः सभाजयन्ति। प्रयोजनवशाद्दूरगा अपि जना महता कौतुकेन स्वगृहमागत्य परिवारसदस्यैः सह सम्भूय महोत्सवमिमं सन्मानयन्ति।

उत्सवेऽस्मिन् प्रधानरूपेण जगज्जनन्या दुर्गायाः समाराधनं विधीयते सर्वैः। तथाहि सर्वेऽपि आश्विनकृष्णामावास्यायां शुक्लप्रतिपदि वा गोमयोपलितायां शुद्धमृदाऽऽच्छादितायां भूमौ गोमयनिर्मितैः समुप्तयवैर्नागैरलंकृतं सिन्दूर-चन्दनफल-वस्त्र-समन्वितं जलपूर्णं कलशं विधि स्थापयित्वा वट-पिप्पलाऽऽम्र-पल्लवादिभिस्तन्मुखं विभूष्य तदुपरि चन्दनादिना निर्मित-यन्त्रायां थाल्यां श्रीदेव्यामूर्तिं संस्थाप्य दीपकलश-गणेशादि-पूजनपुरःसरं तस्यां मूर्तौ श्रीदेव्याःपूजनं समाचरन्ति यवांश्च वपन्ति। इदमेव कर्म घटस्थापनेति नाम्ना प्रसिद्धमस्ति !

आश्विनशुक्ल-प्रतिपदमारभ्य नवरात्रस्य नवस्वपि दिवसेषु यथामति यथालब्धोपचारं धूपोपहार-बलिभिर्लोकमातुः समाराधनं समाचरन्ति जनाः ! पूजान्ते च सप्तशतीस्तोत्र-देवीभागवतपाठादिना प्रसादयन्ति महिषासुरमर्दिनीं ताम्।

तत्रापि सप्तम्यां आरभ्य नवमीपर्यन्तं देव्याराधनरूपो विविध-भक्ष्य-भोज्याऽऽ-स्वादन बहुलो महोत्सवो विशेषण प्रवर्तते। तथाहि-सप्तम्यां प्रातरेव पुस्तकेषु सरस्वतीपूजा विधीयते। अपराह्णे चऽरात्रौ नवदुर्गाणां स्थापनार्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदली-दाडिमीधान्यादीनां नवानां पत्रिकाः संगृह्य पत्रपात्रे दोलायां वा ताः संस्थाप्य वाद्यघोषपुरःसरं देवीपूजास्थानं नीत्वातण्डूलोपरि स्थापयित्वा तासु नवदुर्गाणां पूजनं विधीयते। प्रतिगृहमनयैव विधया दुर्गोपासना भवति।

राजधान्यां तु विशेषतो महताऽऽरम्भेण प्रवर्ततेऽयमुत्सवः। तथाहि सप्तम्याभपराह्णे पुर्वोक्तः पत्रिका दोलायां निधाय मुण्डितशिरस्काः कृतोपवासाः शुचयश्चत्वारो ब्रह्मणायस्तां दोलां स्कन्धेन उदुह्य वाद्य घोषपुरः सरं 'रानी-पोखरी' नाम्न्याः पुष्करिण्याः उत्तरतः विज्ञान-भवनवरिटकायां समानयन्ति ! पुष्पाद्यतादिभिश्च पूजयन्ति ताः पत्रिकाः ! तदैव टुंडीखेलस्य दक्षिणभागे स्थिता राजभराः पुर्वमग्न्यास्त्रैः प्रहरन्ति, तदनु टुंडीखेलं परितः बद्धपक्ति स्थिता गृहीतमुशुण्डीका भटास्ताभिर्भुशुण्डीभिः समकालमेव सशब्दमूर्ध्वं प्रहरन्ति। दूरदूरतः समायाता आसन्नलक्षा नरा उत्सवमेतं पश्यन्ति।

तदनु ता एव पत्रिका राजभवनस्थदुर्गामन्दिरं नीत्वा तासु नवदुर्गाणां सविधि पूजनं भवति। तत्र सहस्त्रं ब्राह्मणाः सप्तशत्याः पाठान् कुर्वते। एतस्मिन् समये स्त्रास्त्राणां च पूजा भवति।

अष्टम्यां नवम्यां चैवमेव पूजां विधाय विशेषतो वलिदानं विधीयते। तत्र अज-महिषं-मेष-हंस कुक्कुटादय उपपुज्यन्ते। आवालवृद्धं सर्वे नरा नार्यश्च नवनवानि वस्त्राणि परिधाया ऽऽभीष्टं भोजनं कृत्वा सामोदं स्थ्यासु वाष्पयानैः पद्मयां च सन्चरन्ते।

दशम्यां च भगवत्या प्रसादग्रहणं कुर्वन्ति जनाः। प्रसादग्रहणक्रियाया दोलारोहणं च कुर्वन्ति। अस्मन् अवसरे समस्त कर्मचारिभ्यः कतिपयदिवसाना मवकाशाः प्रदीयते। नामान्तरं टीकेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन् दिने ज्योतिर्विदादिष्टे शुभ-मुहूर्ते श्री ५ महाराजाधिराजाः सोत्सवै राजपरिवारसदस्यैः संभूय स्वमान्यजनेभ्यः टीकाग्रहणं कुर्वन्ति। स्वाश्रितेभ्यष्टीकाग्रहणार्थिभ्यश्च स्वहस्तेन टीकाप्रदानं कुर्वन्ति। सर्वत्र खादत-मोदता प्रचलति।

कठिनाः शब्दाः

सम्राजयति, भुशुण्डी, आस्तन्तलक्षम्, दोलारोहणम् खादत मोदता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एनं देवतात्मानमेवामन्यत, अनन्तरत्नप्रभवञ्चापश्यत् । महाकविर्भारविः एतस्य महत्वं मुग्धकण्ठमवर्णयत् ।

वैदिककालात् गीयमानगौरवोऽयं हिमालयः "पूर्वापरौ तोयनिधी वगाह्य" पृथिव्या मानदण्ड इव स्थितोऽस्ति । अस्यात्युच्चानि शिखराणि नेपालदेशे विद्यन्ते । एतेषां दर्शनमात्रेणापि आत्मानं कृतार्थयितुं दूरदेशेभ्यः पर्यटका अत्र नेपालदेशे समागच्छन्ति । अत्रत्येषु मनोहरशिखरेषु अन्नपूर्णा-कञ्चनजङ्घा—गौरीशङ्कर-धवलागिरि-सगरमाथादीनि विशेषेण उल्लेखनीयानि सन्ति । सगरमाथानामको हिमकूटो जगति सर्वोच्च इति कथ्यते । उच्चतमस्य अस्य शिखरस्य व्योमकूट इति पुरातनी समाख्या । गौरीशङ्करशिखरस्यापि ऐतिहासिको महिमा विद्यते । पुरा कुमारी गौरी शिवप्राप्त्यर्थमत्र शिखरे दुश्चरं तपश्चचार । तेन तपः प्रभावेण सा लोकैकनायकं शिवं पतिमवाप । ततः प्रभृति एतत् शिखरं गौरीशिखरनाम्ना पर्यचीयत । संस्कृतभाषायां प्रसिद्धो गौरीशिखरशब्द एव नेपालीयभाषायां गौरीङ्कररूपं प्राप । अत्रत्यहिमालयस्य एतादृशीं विशिष्टतां हृदि निधाय अस्माकं नेपालदेशः हिमालयस्य देश इति, हिमवत्खण्ड इति च व्यवह्रियते ।

हिमालयस्य कूटा दुर्गमाः सन्ति । एतस्याधित्यका अपि सर्वदा हिमाच्छन्ना वनस्पतिभिर्विहीना एव वर्तन्ते । उपत्यकासु, नितम्बभागेषु च भूर्ज-साल-सरल देवदारुप्रमुखैः पादपैर्निविडानि महारण्यानि विद्यन्ते । दुर्लभा विविधा महौषधयः अत्र प्राप्यन्ते । अत्र तरक्षु-भल्लूकप्रमुखास्त्रासावहाः जन्तवो विचरन्ति । कस्तुर्यादयो दुर्लभा मृगा अपि एतेष्वेव वनेषु लभ्यन्ते । "डाँफे" नामकोऽस्माकं राष्ट्रियः पक्षिराजः स्वकीयेन सौन्दर्येण वपुर्महिम्ना च हिमप्रदेशमेवालङ्करोति ।

कौशिकीगण्डकीप्रमुखाः स्रोतस्विन्यो हिमालयात् निःसरन्ति । अन्तर्बहिः स्वच्छः सदा आर्द्र एष हिमालयः चरान् अचरांश्च सदा सरसीकरोति । नित्यं द्रवन्नपि एष मात्रां न त्यजति, मर्यादां न जहाति, मलरहितैः स्वच्छैर्हिमजलैः सर्वान् पुष्णाति च ! हिमालयस्य उत्सङ्गे जीवतामस्माकं बाह्ये आन्तरे च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवहारे एतस्य महान् प्रभावो विद्यते। वयं नेपालीयाः सदा स्वच्छाः प्रसन्नाश्च स्मः; अस्माकं भावो दयया बन्धुतया च सर्वदा आर्द्रः अस्ति; वयं राष्ट्रियस्य अन्तराष्ट्रियस्य च हितस्य शान्तेश्च विषये न कदापि मर्यादायाः विचलामः। नगाधिराजेन धर्मतः परिपालिता हिमालयप्रिया वयं नेपालीया हिमालयवदेव सदोच्चैर्वर्तामहे, सदा भ्राजामहे। अस्माकं हिमवत्संस्कृति-विंश्वेषां जनानाँ अध्यात्मं संस्कृत्य विश्वशान्तिलाभे अवश्यं साहाय्यं करिष्यतीति।

अभ्यास :

१. हिमालयेन नेपालस्य नाम संसारप्रसिद्धस्ति" इति समर्थयत।
२. "हिमालयपर्वतभागे कतिप्रकाराः पशुपक्षिणः प्राप्यन्ते वर्णनं कुरुत।
३. नेपालस्थानाँ प्रसिद्धहिमशिखराणां नामानि उल्लेखत।
४. हिमालययस्य धार्मिकं महत्वं दर्शयत।
५. हिमालयस्यादर्शताया महिम्न उपयोगितायाश्च व्याख्यां कुरुत।
६. हिमालयस्य भौगोलिकं महत्वं प्रदर्शयत।
७. काः का नद्यो हिमालयान्निसरन्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समयःज्ञानम्

न केवलं मानुषा अपितु सर्वे प्राणिनः स्वकीयावश्यकतानुसारं समयज्ञानं कुर्वन्ति । अस्मदीयै प्राचीनैराचार्यैस्त्रुट्यादयोऽमूर्त्ताः प्राणादयो मूर्त्ताश्च काल. विभागाः स्वीकृताः । उक्तं च सूर्यसिद्धान्ते

"लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः ।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्त्तश्चमूर्त उच्यते ॥
प्राणादिः काथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्त संज्ञकः ।"

कालज्ञानस्यावश्यकतां प्रकटयन् भास्कराचार्यो लिखति । 'वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्तेतु कालाश्रयेण ।" इति ।

षड्भिः प्राणैः पलम् । षष्टिपलात्मिकैकाघटिका । षष्टिघटिकात्मकमहोरात्रम् । तौ स्त्रिशतामासः द्वादशभिर्मासैः वर्षमिति । वर्षे षऽर्तवो भवन्तीत्यस्मदीयैराचार्यैः स्वीकृतम् । पाश्चात्यास्तु वर्षे चत्वार एव ऋतवो गृहणान्ति । अहोरात्रस्य चतुर्विशत्यंशात्मको 'होरा' नाम विभागस्तस्य षष्टि भागात्मकौ उपविभागौ च यान्त्रिक घटिकासहायेनेदानीं सर्वत्रैव व्यषहृत्यन्ते ।

वर्षस्य द्वादशमासाननुसृत्याआकाशीय रविमार्गमपि मेषादिद्वादशराशिषु विभाजितः । रविमार्गासन्न मार्ग एव चन्द्रः किञ्चिदधिक सप्तविंशतिदिनैर्भ्रमति । अत एव तस्य रविमार्गस्य सप्तविंशतिभागात्मको नक्षत्रनामकविभागश्च पूर्वाचार्यैर्व्यवहृतः । सपादासन्न पञ्च षष्ठ्यधिक शतत्रयमितैर्दिनैः रविर्भचक्र भ्रमणं करोति । 'श्वेरचक्रभोगोऽर्कवर्षं प्रदिष्टम्' इत्यनेन सः सौरवर्षः । देवदानवानाँ सौम्ययाम्य ध्रुवप्रदेशनिवासिनां महोरात्रम् । ४३२०००० सौरवर्षं.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महायुगः। महायुगस्य दशमोभागश्चतुस्त्रिद्व्येकगुणः क्रमात् सत्य-त्रेता-द्वापर-कलियुगानां प्रमाणम् एकसप्तति महायुगैर्मनुः। कृतप्रमाणपञ्चदशसन्धिभिः सहितैश्चतुर्दशमनुभिः सहस्त्रसंख्यकैर्वा महायुगैः कल्पोब्रह्मदिनं वा। कल्पादितः षण्मनवः, सप्तमगनोः सप्तविंशतिमहायुगानि, सत्यत्रेताद्वापराश्च व्यतीताः। कतिपया आचार्याः कल्पारम्भसृष्ट्यारम्भयोर्युगपत्त्वं स्वीकुर्वन्ति। सूर्यसिद्धान्तादयस्तु कल्पादेरनन्तरमेव सृष्ट्यारम्भमिति प्रकल्पयन्ति। सृष्ट्यादौ कल्पादितः १,७०,६४,००० सौरवर्षा व्यतीता इति सूर्यसिद्धान्तमत मनुसृत्य वर्तमान कलियुगादौ सृष्ट्यादितः १९५५८८०००० सौराब्दाः प्रयाता इत्यङ्गीकृत्य पञ्चाङ्गपत्रादिषु कलेर्गताब्दाः सृष्टादितोगताब्दाश्च उल्लिख्यन्ते।

मध्यमगत्यागच्छन् गुरुर्यावत्कालमेकस्मिन् राशौ तिष्ठति स वार्हस्पत्यब्दः। प्रभवादयः षष्टि संवत्सरा वार्हस्पत्यभानेन भवन्ति। वार्हस्पत्यब्दस्य सौराब्दान्न्यूनत्वाच्चतुरशीतिवर्षैः संवत्सरक्षयः।

यावत्कालं रविरेकस्मिन् राशौ तिष्ठति ससौरमासः। राशिप्रवेशसमयः संक्रमणकालः। रविमार्गे यदा रविचन्द्रयोः पूर्वापरान्तराभावस्तदा दर्शान्तः। यदा च भचक्रार्धान्तरंन्तदा पूर्णिमान्तः। द्वयोर्दशान्तयोरन्तर्वत्तिकालः चान्द्रमास। अमान्तपूर्णिमान्तभेदेन चान्द्रमासो द्विधा व्यवहृयते। गणनायां दर्शान्तः, व्रतादिषु च पूर्णिमान्तः। चान्द्रमासे त्रिंशान्मता स्तिथयः-शुक्लपक्ष नाम यदा चन्द्रौ वृद्धियाति पञ्चदशः, कृष्ण पक्षे नाम यदा चन्द्रः क्षीयते पञ्चदशः। अत एव रवीन्द्रोर्द्वादशाशान्तरमेकस्यस्तिथेर्भोगः। तयोर्गतिपरिवर्तनवशात् तिथिभोगकालो वर्धते ह्रसते च। एवं चन्द्रगतिवशानक्षत्र भोगकालः सूर्य गतिवशात् सौरमासदैर्ध्यश्च नैकरुपौ भवतः।

द्वादशचान्द्र मासात्मकात् चान्द्रवर्षात् सौरवर्षस्यैकादशदिनैर्दीर्घत्वादेव "द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा। घटिकाना चतुष्केन पततिह्यधिमासकः॥" इत्युत्तम्! परन्त्वेतमध्यभमान परम्। मासानां चैत्रादि नामानि पौर्णान्तिनक्षत्रयोगादुत्पन्नानि। यदाह पाणिनी "साऽस्मिन् पौर्णमासीति संज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याम् ४।२।२१" साम्प्रतं सर्वेसां चान्द्रमासानां नामानि सौरमासानुरोधेन निर्धा यन्ते । अत एवाधिमासविषयेभास्कराचार्येणेक्तम्:- "असंक्रान्तिमासोऽधिमासः स्फुटं स्याद् द्विसंक्रन्तिमासः क्षयाख्यः कदाचित्" ।

"तिथिर्वारश्चनक्षत्रंयोगः करणमेव च" इत्येतानि पञ्चाङ्गानि । रवि-सोम-भौम-बुध-गुरु-शुक्र-शनैश्चराणां क्रमेण वाराः । राहु-केतवः सप्तवारा-धियैसह नवग्रहा भवन्ति । सृष्ट्यादौ रविवार; वर्तमानकलियुगादौ च शुक्रवारः सर्वेराचार्यैः स्वीकृतम् । यद्यपि सूर्यसिद्धान्ते वार प्रवृत्तिः क्षपार्धात् स्वीकृतं परन्तु "वारप्रवृत्तिर्मिहिरोदयात्" इत्यनुसारेण सूर्योदयादेव दिनादिर्व्यवहारे स्वीकृतः । सूर्योदद्वयव्यपीनां तिथिनक्षत्रयोगानां वृद्धि-रिनोदयरहितानां तेषाञ्चक्षयः । विष्कुम्भादि सप्तविंशति योगसाधनं रविचन्द्रयोर्योगादेव विधीयते (तिथ्यर्धं करणम्) शकुन्यादि चत्वारि स्थिर-करणानि बबादयः सप्त चलकरणानि । दिनश्य रात्रेश्च पञ्चदशभागो मुहूर्तः । विशेषतास्तिथिसमाप्तिकालानुरोधेन व्रतोत्सवादीना निर्णयो विधीयते ।

सङ्कल्पादौ 'ब्रह्मणोद्वितीयपरोर्द्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे' इति स्मरणानन्तरं वर्तमानमहायुगादीनांन्तिथ्यन्तानां नामग्रहणन्तदनु रविचन्द्रवृहस्प-त्याश्रितानां राशीनाञ्च संस्मरणो विधियते । विशेषावसरे त्वन्येषामपिनाम-ग्रहणं विधीयते ।

पञ्चाङ्गपत्रे विविधकार्योपयोगिनो बहवो ज्ञातव्यंविषया उल्लि-ख्यन्ते । पञ्चाङ्गपत्रस्थविषयानां ज्ञानं हिन्दूनां परमावश्यकम् । विशेषतो जिगभिषूणां कृते तु पञ्चाङ्गनिर्माणविधेर्ज्ञानमपि बुद्धिवर्धकमुपादेयतमञ्च भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. पञ्चागानां नामानि तेषांवर्णन पुरःसरं लिख ।

२. तिथिनक्षत्रयोगानां क्षयवृद्धी कथं भवतः ?

३. कलियुगादौ सृष्ट्यादितो गताब्दाः कति भवन्तीति विगणय ।

४. कल्पे सहस्रसंख्यकानि महायुगानि भवन्तीति प्रमाणयत ।

५. किमर्थं प्राचीनैराचार्यैः सप्तविंशतिनक्षत्राणि द्वादशराशयश्च गृहीतानि ?

६. नवग्रहाणां नामोल्लेखनं कार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमर कोषः

मङ्गलम्

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः ! स श्रिये चामृताय च ॥१॥

प्रतिज्ञा

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥२॥

परिभाषा

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥३॥

परिभाषा

भेदाख्यानाय न द्वन्दो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गनामनुक्तानां क्रमादृते ॥४॥

परिभाषा

त्रीलिंङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्ग शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रक्रमाङ्काः

१. स्वरव्ययं स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः ।
२. सुरलोको द्योदिवौ द्वे स्त्रियां क्लीवे त्रिविष्टपम् ॥६॥ (क) स्वर्गको नाम
३. अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः
४. सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥७॥
५. आदितेया दिविषदो लेखा अदितिनन्दनाः ।
६. आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥८॥
७. बर्हिर्मुखाक्रतुभुजो गीर्वाणा दानवारयः ।
८. वृन्दारका दैवतानि पुंसि वा देवता स्त्रियाम् ॥९॥ (ख)
९. आदित्यविश्ववसवस्तुषिताऽऽभास्वराऽनिलाः ।
१०. महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥१०॥
११. विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः ।
१२. पिशाचो गुह्यकः सिद्धो भूतोऽमीदेवयोनयः ॥११॥ (घ)
१३. असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
१४- शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥१२॥
१५. सर्वः सुगतो बुद्धो धर्मराजस्तथागतः ।
१६. समन्तभद्रो भगवान मारजिल्लोकजिज्जिनः ॥१३॥
१७. षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
१८. मुनिन्द्रः श्रीधनः शास्ता मुनिः शाक्यमुनिस्तु यः ॥१४॥
१९. स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
२०. गौतमश्चार्कबन्धुश्च मायादेविसुतश्च सः ॥१५॥
२१. ब्राह्माऽऽत्मभू सुरज्येष्ठः परमेष्ठी पितामहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६९. कपर्दोऽस्य जटाजूट; पिनाकोऽजगवं धनुः ।
७०. प्रमथाः स्युः पारिषदाः व्राह्मीत्याद्यास्तु मातरः ॥३७॥
७१. विभूतिभूतिरैश्वर्यमणिमादिकमष्टधा ।
७२. (उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥३८॥
७३. शिवा भवानी रुद्राणी शर्वाणी सर्वङ्गला ।
७४. अपर्णा पार्वती दुर्गा मृडानि चण्डिकाऽम्बिका ॥३९॥
७५. आर्या दाक्षयणी चैव गिरिजा मेनकात्मजा ।
७६. विनायको विघ्नराजद्वैमातुरगणाधिपा;) ॥४०॥
७७. (अप्येकदन्तहेरम्बलम्बोदरगजाननः ।)
७८. (कार्तिकेयो महासेन; शरजन्मा षडाननः ॥४१॥
७९. पार्वतीनन्दन; स्कन्द; सेनानीरग्निभूर्गुहः ।
८०. वाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ॥४२॥
८१. षाण्यातुरः शक्तिधरः कुमारः कौञ्चदारणः ।
८२. श्रृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः) ॥४३॥
८३. कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका ।
८४. इन्द्रो मरुत्वान् मधवा विडौजाः पाकशासनः ॥
८५. वृद्धश्रवाः शुनासीर; पुरुहूतः पुरन्दरः ॥४४॥
८६. जिष्णुलेखीर्षभः शक्रः शतमन्युर्दिवस्पतिः ।
८७. सुत्राभागोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥४५॥
८८. वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ।
८९. जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥४६॥
९०. सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।
९१. आखण्डलः सहस्राक्षः ऋभुक्षास्तस्य तु प्रिया ॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९२. पुलोमजा शचीन्द्राणी नगरी त्वमरावती ।
९३. हयः उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ॥४८॥
९४. स्यात्प्रासादो वैजयन्तौ जयन्तः पाकशासनिः ।
९५. ऐरावतोऽभ्रमातङ्ग रावणाभ्रमुवल्लभाः ॥४९॥
९६. (ह्लादिनीवज्रमस्त्री स्यात् कुलिशं भिदुरं पविः ।
९७. शतकोटिः स्वरुःशम्बो दम्भोलिरशनिर्द्वयोः) ॥५०॥
९८. व्योमयानं विमानोऽस्त्री नारदाद्याः सुर्षयः ।
९९. स्यात् सुधर्मा देवसभा पीयूषममृतं सुधा ॥५१॥
१००. मन्दाकिनी विपदङ्गास्वर्णदी सुरदीर्घिका ।
१०१. मेरुः सुमेरुर्हेमाद्री रत्नसानुःसुरालयः ॥५२॥
१०२. पञ्चैते देवदरवो मन्दारः पारिजातकः ।
१०३. सन्तानः कल्पवृक्षस्च पुंसि वा हरिचन्दनम् ॥५३॥
१०४. सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ।
१०५. नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥५४॥
१०६. स्त्रियां वहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखा ।
१०७. हाहा हुहुश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥५५॥
१०८. अग्निर्वैस्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ।
१०९. कृपीटयोनिर्ज्वलनो जातवेदस्तनूनपात ॥५६॥
११०. बर्हिः शुष्माकृष्णवर्त्मा शोचिष्केशः उषर्बुधः ।
१११. आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥५७॥
११२. रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ।
११३. हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ॥५८॥
११४. सप्ताचिर्दमुनाः शुक्रश्चित्रभानुविभावसुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११५. शुचिरप्पित्तमौर्वस्तु वाडवो बडवानलः ।।५९।।
११६. वह्नेर्द्वयोर्ज्वालकीलावर्चिहेतिः शिखा स्त्रियाम् ।
११७. त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ ।।६०।।
११८. उल्का स्यान्निर्गतज्वाला भूतिर्भसितभस्मनी ।
११९. क्षारो रक्षा च दावस्तु दवो वनहुताशनः ।।६१।।
१२०. धर्मराजः पितृपतिः समवर्ती परेतराट् ।
१२१. कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ।।६१।।
१२२. कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।
१२३. राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः ।।६२।।
१२४. रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः ।
१२५. यातुधानः पुण्यजनो नैरृतो यातुरक्षसी ।।६३।।
१२६. प्रचेता वरूणः पाशी यादसांपतिरप्पतिः ।
१२७. श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ।।६४।।
१२८. पृषदश्वो गन्धवहो गन्धवाहनिलाऽऽशुगाः ।
१२९. समिरमारुतमरुज्जगत्प्राणसरीणाः ।।६५ ।।
१३०. नभस्वद्वातपवनपवमानप्रभञ्जनाः ।
१३१. प्रकम्पनो महावातो झञ्झावातः समृष्टिकः ।।६६।।
१३२. प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
१३३. शरिरस्था इमे रंहस्तरसी तु रयः स्यदः ।।६७।।
१३४. जवोर्थ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ।
१३५. सत्वरं चपलं तूर्णमविलम्बिताशु च ।।६८।।
१३६. सततेऽनारताऽश्रान्तसन्तताविरतानिशम् ।
१३७. नित्याऽनवरताऽजस्रमप्यथातिशयो भरः ।।६९।।
१३८. अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३९. तीव्रैकान्तनितान्तानि गाढवाढदृढानि च ॥७०॥
१४०. क्लीबे शीघ्रद्यिसत्वे स्यात् त्रिष्वेषां वेद्यगामि यत् ।
१४१. कुवेरस्त्र्यम्बकसखो यक्षराड गुह्यकेश्वरः ॥७१॥
१४२. मनुष्यधर्मा धनदो राजराजो धनाधिपः ।
१४३. किन्नरेशो वैश्रण पौलस्त्यो नरवाहनः ॥७२॥
१४४. यक्षैकपींङ्गलविलश्रीदपुण्यजनेश्वराः ।
१४५. अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः ॥७३॥
१४६. कैलाशः स्थानमलका पूर्बिमान तु पुष्पकम् ।
१४७. स्यात्किन्नरः किंपुरूषस्तुरङ्गवदनो मयुः ॥७४॥
१४८. निधिनां शेवधिर्भेदाः पद्मशङ्खादयो निधेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकारादिशब्दानुक्रमणि

अ.	प्रक्रमाङ्काः
अग्नि	१०८
अग्निकण	११७
अग्निभू	७९
अच्युत	३०
अच्युताग्रज	३९
अजकव, अजगव	६९
अजस्त्र	१३७
अजिमर	७१
अतिमात्र	१३८
अतिवेल	१३८
अतिशय	१३७
अत्यर्थ	१३८
अदितिनन्दन	५
अद्वयवादिन्	१७
अधोक्षज	३४
अनङ्ग	४४
अनन्यज	४४
अनवरत	१३७
अनिरुद्ध	४७
अनिल	९
अब्जयोनि	२३
अभ्रमातङ्ग	९५
अभ्रमुवल्लभ	९५
अमर	३
अमरावति	९२
अमर्त्य	६
अमृत	९९
अमृतान्वस्	६
अम्बिका	७४
अर	१३४
अर्कबन्धु	२०
अलका	१४६
अविरत	१३६
अविलम्बित	१३५
अशनि	९७
अश्रप	१२३
अश्रान्त	१३६
अश्विन्	१०५
अश्विनीसुत	१०४
अष्टमूर्ति	६८
असुर	१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिल १२८
अनिश १३६
अन्तक १२२
अन्धकरिपु ६६
अपर्णा ७४
अपान १३२
अप्पति १२६
अप्पित्त ११५
अप्सरस् ११
आदित्य ६
आभास्वर ९
आशर १२३
आशुग १२८
आश्रयाश १११

अस्वप्न ६
अहिर्बुध्न्य ६८

आ

आखण्डल ९१
आच्छादन १४३
आत्मभू २१
आत्मभू ४६
आदितेय ५
आदित्य ६
आनकदुन्दुभि ३८
आर्या ७५
आशु १३५
आशुशुक्षणि ११२
अश्विनेय १०५

इ

इन्दिरा ४९
इन्द्राणी ९२
इन्द्रावरज ३१
इन्द्र ८४
इन्द्रारि १३

ई

ईश ५८
ईश्वर ५९
ईश्वरी ७२
ईशान ५९
ईश्वरा ७२

उ

उग्र ६२
उदात १३२
उच्चैःश्रवस् ९३
उद्गाढ १३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपेन्द्र ३१
उमापति ६७
उल्का ११८
उषापति ४७
उमा ७२
उर्वशी १०६
उषबु‍ध ११०

ऋ

ऋभू ६
ऋश्यकेतु ४७
ऋष्यकेतु ४७

ए

एकदन्त ७७
एकान्त १३६
एकपिङ्ग १४४

ऐ

ऐडविड (ल) १४४
ऐरावत ६५
ऐरावज ६५
ऐश्वर्य ७१

औ

और्व ११५

क

कंचाराति ३४
कपर्द ६६
कपालभृत् ६२
कमलाशन २३
कर्बुर १२४
कात्यायनि ७२
कामपाल ४०
काल १२२
किन्नर ११
कंदर्प ४४
कपर्दिन् ६२
कमला ४८
कर्बर १२४
कल्पवृक्ष १०३
काम ४४
कार्तिकेय ७८
कालिन्दीभेद ४२
किंपुरुष १४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कील	११६	कुबेर	१५१
कुमार	८१	कुलिश	९६
कुचुमेषु	४५	कृतान्त	१२१
कृत्तिवासस्	१६१	कृपीय्योनि	१०९
कृशानु	१११	कृशानुरेतस्	६४
कृष्ण	२७	कृष्णवर्त्मन्	११०
केशव	२८	कैटभजित्	३५
कैलास	१४६	कोजप	१२३
कौजप	१२३	कौपोदकी / कौमोदकी	५२
कौस्तुभ	५२	क्रतुभुज	७
क्रव्यात्	१२३	क्रव्याद	१२३
क्रौञ्चदारन	८१	क्षिप्र	१३४
क्षीरोदतनया	४९		
	ख		
खगेश्वर	५६	खण्डपरशु	६०
	ग		
गङ्गाधर	६६	गजानन	७७
गणदेवता	१०	गणाधिप	७६
गन्धर्व	११	गन्धर्व	१०७
गन्धवह	१२८	गरुड	५६
गरुडध्वज	२९	गरुभद	५६
गिरिजा	७५	गिरिश	६०
गिरीश	६०	गीर्वाण	७
गुह	७९	गुह्यक	१२
गुह्यकेश्वर	१४४	गोत्रभिद्	८७
गोविन्द	२९	गौतम	२०
गौरी	७२		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च

चक्रपाणि ३१
चतुराननं २२
चन्द्रशेखर ५९
चण्डिका ७४
चतुर्भुज ३१
चैत्ररथ १४५

ज

जनार्दन ३०
जयन्त ९४
जातवेदस् १०९
जिन १६
ज्वलन १०९
जम्भभेदिन् ८९
जन्मशायिन् ३७
जातुधान १२५
जिष्णु ८६
ज्वाल ११६

झ

झषकेतु ४७

त

तथागत १५
तरस् १३३
तार्क्ष्य ५६
तीव्र १३९
तुरङ्गवदन १४७
तुषित ९
त्रिदशालय १
त्रिदिवेश ४
त्रिलोचन ६३
त्रिविष्टप २
त्वरित १३४
तनूनपात् १०९
तारकजित् ८०
तालाङ्क ४१
तुण्डिन् ८२
तुराक्षाह ९०
त्रिदश ३
त्रिदिव १
त्रिपुरान्तक ६५
त्रिविक्रम ३२
त्र्यम्बक ६५

द

दण्डधर १२२
दनुन्स ११४
दर्पक ४४
दनुज १३
दम्भोलि ९७
दशवल १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दस्त १०५
दाक्षयणी ७५
दानवारि ७
दिव् २
दिविषद् ५
दुर्गा ७४
दृढ १३६
देवकीनन्दन ३३
देवता ८
देवसभा ९९
दैत्य १३
दैवत ८
द्रुत १३४
द्वैमातुर ७६
दहन ११३
दानव १३
दितिसुत १४
दिवस्पति ८६
दिवौकस् ४
दुश्च्यवन ९०
देव ३
देवतरु १०२
देवयोनि १२
दैतेय १३
दैत्यारि २९
द्यो (द्यौः) २
द्रुहिल २३

ध

धनञ्जय १०८
धन्नधिप १४२
धर्मराज १२०
धनद १४२
धर्मराज १५
धातृ २३

न

नन्दक ५२
नन्दिक ८२
नमस्वत् १३०
नरकान्तक ३६
नलकूबर १४५
नारद ९८
निकषात्मज १२४
नित्य १३७
नन्दन ९३
नन्दिकेश्वर ८२
नमुचिसूदन ८६
नरवाहन १४३
नागान्तक ५७
नासत्य १०५
नितान्त १३९
निधि १४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्जर ३
नीललोहित ६४
नैर्ऋत १५६
निर्भर १३८
नीलाम्बर ४१

प

पञ्चशर ४४
पद्मा ४८
पन्नगाशन ५७
परेतराज् १२०
पशुपति ५८
पाकशासनि ९४
पारिजातक १०२
पार्वतीनन्दन ८९
पितामह २१
पिनाक ६९
पिशाच १२
पीयूष ९९
पुण्यजन १२५
पुरन्दर ८५
पूरुषोत्तम ३३
पूलोमजा ९२
पूर्वदेव १४
पेयूष ९९
प्रकम्पन १३१
प्रजापति २४
प्रभञ्जन १३०
प्रमाण १३२
प्रमथाधिप ६१
पद्म १४८
पद्मालया ४८
परमेष्ठित् २१
पवि ९६
पाकशासन ८४
पाञ्चजन्य ५१
परिषद ७०
पार्वर्ती ७४
पावक १११
पितृपति १२०
पिनाकिन् ६१
पीताम्बर ३०
पुण्डरीकाक्ष २९
पुण्यजनेश्वर १४४
पूरालापूरुष ३६
पूरुहूत ८५
पूण्यघेन्वन् ४६
पृषदश्व १२८
पौलस्त्य १४३
प्रचेतस् १२६
प्रद्युम्न ४३
प्रमथ ७०
प्रलम्बघ्न ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब

बर्हिस् ११०
बल ४२
बलभद्र ३९
बलाहक ५४
बाहुलेय ८०
बुद्ध १५
ब्रह्मन् २१
ब्राह्मी ७०
बर्हिर्मुख ७
बलदेव ३९
बलाराति ८८
बलिध्वासित ३४
बिडौजस ८४
बृहध्द्यान् १११
ब्रह्मसु ४७

भ

भगवत् १६
भर्गा ६५
भव ६७
भष्मन् ११८
भिंदिर ९६
भीम ६७
भृङ्गिन ८२
भृशम् १३८
भर्ग ६५
भवानी ७३
भार्गवी ५०
भिदुर ९६
भूत १२
भूतेश ६०
भूति ७१

म

मकरध्वज ४६
मदन ४३
मनसिज ४५
मन्दाकिनी १००
मयु १४७
मरुत्वन् ८४
महानट ६८
महावान् १३१
मघवन् ८४
मधुरिपु ३२
मनुष्यधर्मन् १४२
मन्मथ ४३
मरुत् १२९
महादेव ६३
महाराजिक १०
महासेन ७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेश्वर ५८
मातरिश्वन् १२७
मातृ ७०
मायादेविसुत २०
मारजित् १६
मुकुन्द ३७
मुनीन्द्र १८
मुसलिन् ४१
मृडानी ७४
मेघपुष्प ४५
मेनकात्मजा ७५
मा ४९
मातलि ९३
माधव २८
मार ४३
मीनकेतन ४३
मुनि १८
मुरमर्दन ३७
मृड ६०
मृत्युञ्जय ६१
मेघवाहन ९०
मेरु १०१

य

यक्ष ११
यक्षराज १४१
यम १२१
यमुनाभ्रातृ १२१
यातुधान १२५
यक्ष्म १४४
यज्ञपुरुष ३६
यमराज १२१
यातु १२५
यादसांपति १२६

र

रंहस् १३३
रक्षस् १२५
रजोमूर्ति २६
रत्नसानु १०१
राक्षस १२३
राम ४०
रुद्र १०
रुद्राणी ७३
रौहिणेय ४१
रक्षस् ११
रक्षा ११९
रतिपति ४६
रम्भा ४९
राजराज १४२
रिटि ८२
रुद्र ६७
रेवतीरमण ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल

लक्ष्मी	४८	लघु	१३४
लम्बोदर	७७	लेख	५
लेखर्षभ	८६	लोकजननी	५०
लोकजित्	१६	लोकमातृ	४५
लोकेश	२२		

व

वज्र	९६	वज्रिन्	८७
वडवानल	१११	वनमालिन्	३४
वरन	१२६	वरुण	१२६
वसु	९	वसुदेव	३८
वह्नि	१०८	वाडव	११५
वात	१३०	वामदेव	६३
वासभ	८७	वासुदेव	३२
वास्तोष्पति	८८	विघ्नराज	७६
विद्याधर	११	विधातृ	२४
विधि	२४	विधु	३५
विनायक	१७	विनायक	७६
विबुध	३	विभावसु	११४
विभूति	७१	विमान	९८
विरिञ्च	२३	विरिञ्चि	२३
विरुपाक्ष	६३	विशाख	८०
विश्व	९	विश्वकेतु	४७
विस्वम्भर	३५	विश्ववसु	९
विश्वसृज	२४	विष्टरस्रवस्	२७
विष्णु	२७	विष्णुरथ	५७
विश्वकूसेत	३०	वीतिहोत्र	१०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्रहन् ८७
वृन्दारक ८
वृषन् ८७
वैकुण्ठ २७
वैनतेय ५६
वैस्रवण १४३
व्यान १३२
व्योमयान ९८
वृद्धस्रवस् ८५
वृषध्वज ६६
वेधस् २४
वैजयन्त ९४
वैवस्वत ११२
वैश्वानर १०८
व्योमकेश ६७

श

शम्ब ९७
शक्र ८६
शङ्ख १४८
शचीपति ८८
शतमन्यु ८६
शम्ब ९७
शम्भु ५८
शर्व ५९
शाम्यमुनि १८
शार्ङ्ग ५३
शास्तृ १८
शिखावत् ११२
शितिकण्ठ ६२
शिवा ७३
शुक्रशिष्य १४
शुनासीर ८५
श्रृङ्गिन् ८२
शौद्धदनि १९
श्राद्धदेव १२२
शक्तिधर ८१
शङ्कर ५९
शची ९२
शतकोटी ९७
शपन १२१
शम्बरारी ४५
शरजन्मन ७८
शर्वाणी ७३
शाम्यसिंह १९
शार्ङ्गिन् ३०
शिखा ११६
शिखिवाहन ८०
शिव ५८
शिवी ७३
शुनाशीर ८५
शूलिन ५८
शोचिष्केश ११०
शौरि ३३
श्री ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीकण्ठ ६२
श्रीद १४४
श्रीवत्सलाञ्छन ३५
श्वसन १२७
श्रीधन १८
श्रीपति ३३
श्रीवत्स ५३

ष

षडभिज्ञ १७
षाड्मातुर ८१
षडानन ७८

स

सङ्कर्षण ४२
सञ्ज्वर ११७
सत्वर १३५
सदानन्द २६
सन्ताप ११७
समन्तभद्र १६
समान १३२
सम्ब ६७
सर्वज्ञ १५
सर्वज्ञ ६४
सर्वार्थसिद्ध १९
साध्य १०
सीरपाणि ४२
सुग्रीव ५४
सूधर्मा ९९
सुनासीर ८५
सपर्वन् ४
सुर ३
सुरदीर्घिका १००
संक्रन्दन ९०
सततम् १३६
सदागति १२७
सनत्कुमार १०४
सप्तार्चिस् ११४
समवर्तिन् १२०
समीरण १२९
सम्बरारि ४५
सर्व ५९
सर्बमगंला ७३
सहस्त्राक्ष ९१
सिद्ध १२
सुगत १५
सुदर्शन ५१
सुधा ९९
सुपर्ण ५७
सुभनस् ४
सुरज्येष्ठ २१
सुरद्विप १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरपति ८८
सुरलोक २
सेनानि ७९
स्थाणु ६७
स्फुलिङ्ग ११७
स्मरहर ६५
स्रस्टृ २४
स्मर ४४
स्वर्ग १
स्ववैंद्य १०४
सुरर्षि ९८
सुरालय १०१
स्कन्द ७९
स्पर्शन १२७
श्वर १
स्यद १३३
स्वभू २८
स्वरू ९७
स्ववेंश्या १०६
स्वाराज ८०

ह

हंसवाहन २६
हरिचन्दन १०३
हरिहल ८९
हलिन ४१
हाहा १०७
हिरण्यरेतस ११३
हुतभुज् ११३
हुहू १०७
हेरम्ब ७७
हृद ४७
हृषीकेशर २८
हर ६५
हरिप्रिया ४८
हलायुध ४०
हव्यवाहन ११३
हिरण्यगर्भ २२
हीर ६५
हुहु १०७
हेशर २७
हेमाद्रिः १०१
हैमवती ७२
ह्लादिनी ९६
हेति ११६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीय खण्डः

पद्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदिक सूक्तिः

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् यज्ञंदधे सरस्वती ॥१॥
पुरुष एदेवं सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्येमे हिमवन्तो महित्वा स्य समुद्रं रसया सहाहुः ।
यस्येमा, प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥३॥
ईशा वास्यमिदं सर्वं यत्किं च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥४॥
कुर्वन्नेव कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यतेनरे ॥५॥
अविधायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥६॥
यामृषयो मन्त्रकृतो मनीषिणः अन्वैच्छन् देवास्तपसा श्रमेण ।
तां देवीं वाचं हविषा यजामेह सा नो दधातु सुघृतस्य लोके ॥७॥

(वेदोपनिषदः)

शब्दार्थाः

चोदयित्री = प्रेरयित्री
मा गृधः = लोभं मा कुरु
विधेम = परिचरेयाः
दन्द्रम्यमाणः =
परियन्ति = परिभ्रमन्ति
चेतन्ती = चैतन्यं प्रसारयन्ती

अभ्यासः

१. पुरुषस्य महत्त्वं दर्शयत ।
२. कर्मणः लेपः कथं न भवति ?
३. जगति विषयभोगः कया भावनया कर्तव्यः ।
४. अन्धेन नीयमानाअन्धाः कथं परियन्ति ?
५. सरस्वत्याः कार्यकलाप वर्णयत ।
६. संस्कृत वाङ्मयं कैः कथ मुत्पादितम् ? तस्य संरक्षणे को लाभः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पश्य पश्य, अयमेव नो नेपालः

तदर्थमेव लेखकः म. वी. वि. शाह
रुपान्तरयिता–पूर्णप्रसादःब्राह्मणः



CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एत्य विलोकय नेपालोयम्
यत्राऽस्माभिर्जन्म गृहीतम्
नो कृत्रिमता क्वचिदस्त्यस्मिन्
यत्रैवाऽस्ति प्रकृतेः कोषः !

उदिते चन्द्रे हिमशैलं तम्
व्याप्नोति यदा तस्य ज्योत्स्ना
भास्वरवर्णं कीदृग् रुचिरम्
दृश्यं विलसति पश्योत्तरतः

भेदित कटकाः स्रावित सलिलाः
यत्र महान्तः पर्वतभागा.
सममुत्फुल्लाः यत्र हि सुरसा
साला सरला वनमुद्गाश्च

यत्र हि रथ्या रक्तदलानाम्
कुसुमै र्भूषित सर्वाङ्गास्ति
यत्र नदीनदनिवहश्चाऽसौ
नृणां हृन्निर्मलयन् वहति !

यत्राऽस्माकं खनयो मन्दिर—
घण्टा गोष्ठै सत्रा सन्ति
यत्र पिकश्चाऽनेकपशाखां
श्रित उच्चरवो मधुमाह्वयति !

अयमपि नेपालो दक्षिणतो
याऽस्ति तटी चामीकरदीप्तिः
यत्र विशालाः समभूम्यस्ता
आनत कणिशा आकर्षन्ति !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा काली पश्चिमतो वहति
पूर्वस्यां सा मेची वहति
तेनाऽस्माकं वनभू हरिता
वन्यै पशुभिर्व्याप्ता भवति

भाषाः सन्त्यस्माकमनेकाः
जातानि यथास्वं, किन्त्वेकम्
नेपालित्वं पुष्पवदङ्कित-
केतनमाश्रितमस्त्यस्माकम्

कठिना शब्दाः

केतनम्, पुष्पवदङ्कितम्, चामीकरम्, कटकः सत्रा, कणिशः ।

अभ्यासः

१. "अस्मद्देशे प्रकृतेः कोषो विद्यते" समर्थयत ।

२. अधोलिखितविषयेषु प्रत्येकविषये भिन्नं भिन्नं संक्षिप्तं निबंधं रचयत–

(क) नेपालस्य पर्वतमाला ।

(ख) नेपालस्य वन्यप्रदेशाः

(ग) नेपालस्य पशुपक्षिणः ।

(घ) नेपालस्य नद्यः तेषामुपयोगिता च

(ङ) नेपालस्य मन्दिराणि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैमासीक
जाच

'सनातनश्लोका:'

धृतिः क्षमा दमोऽस्तेयं शौच मिन्द्रियनिग्रहः
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥८॥

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टि रेव च ॥२॥

धर्म एव हतो हन्ति धर्मो रक्षति रक्षतः
तस्माद् धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥३॥

धर्मे तिष्ठन्ति भूतानि धर्मो राजनि तिष्ठति
तं राजा साधु यः शास्ति स राजा पृथिवीपतिः ॥४॥

राष्ट्रस्यैतत् कृत्यतमं राज्ञ एवाभिषेचनम्
अनिन्द्रमबलं राष्ट्रं दस्यवोऽभिभवन्त्युत ॥५॥

रक्षणादार्यवृत्तानां कण्टकानां च शोधनात्
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः ॥६॥

सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्
अब्रुवन विब्रुवन् वापि नरो भवति किल्विषी ॥७॥

व्यमनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
व्यमन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ॥८॥

नात्मानमवन्येत पूर्वाभिरसमृद्धिभिः ।
आमृत्योः श्रिय मन्विच्छेन नैनां मन्येत दुर्लभाम् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्
एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥१०॥

अयतां धर्मसर्वस्वं श्रुत्वा चैवाऽवधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥११॥

अभ्यासः

१. धर्मलक्षणं किम् ? स्पष्टम् उल्लेख्यम् ।
२. सुखदुःखयोलक्षणं किं विद्यते ? उल्लिखत ।
३. राज्ञो महिमानं दर्शयत ।
४. संबन्धं स्थापयत ('क' भाग स्थितानां अंशानाम्, 'ख' भागस्थैः अंशैः सह) ।

(क)	(ख)
व्यसन्यधोधो व्रजति	वक्तव्यं वा समञ्जसम्
तस्माद् धर्मो न हन्तव्यो	धर्मो रक्षति रक्षितः ।
अब्रुवन् विब्रुवन् वापि	स्वर्यात्यव्यसनी मृतः ।
व्यवसनस्य च मृत्योश्च—	मा नो धर्मो हतो वधीत् ।
धर्म एव हतो घ्नन्ति	नरो भवति किल्बिषी ।
सभां वा न प्रवेष्टव्यम्	व्यसनं कष्टमुच्यते ।
	किं तावद् धर्मसर्वस्वम् ?

५. रिक्तस्थानं उपयुक्तशब्दस्यापनेन पूरणीयम्—
प्रजापालनतत्परा नरेन्द्रास्त्रिदिवं यान्ति (१)......................
(२)......................

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्ध-वचनम्

यश्च वर्षशतं जीवेद पश्यन् धर्ममुत्तमम् ।
एकाहं जीवितं श्रेयः पश्यतो धर्ममुत्तमम् ॥

(१)

शीलदर्शनसम्पन्नं धर्मिष्ठं सत्यवादिनम् ।
आत्मनः कर्म कुर्वाणं तं जनः कुरुते प्रियम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२)

न हि वैरेण वैराणि शाम्यन्तीह कदाचन ।
अवैरेण च शाम्यन्ति, एष धर्मः सनातनः ।।

(३)

अक्रोधेन जयेत् क्रोधं, असाधुं साधुना जयेत् ।
जयत् कदर्यं दानेन सत्येनाऽलीकवादिनम् ।।

(४)

मात्रासुख परित्यागात् पश्येच्चेद् विपुलं सुखम् ।
त्यजेन्मात्रा सुखं धीरः संपश्यन् विपुलं सुखम् ।।

(५)

असारे सार मतयः सारे चासार दर्शिनः ।
ते सारं नाधिगच्छन्ति मिथ्यासंकल्पगोचराः ।।

(६)

आरोग्यं परमो लाभःसन्तुष्टी परमं धनम् ।
विश्वासः परमा ज्ञातिः निर्वाणं परमं सुखम् ।।

(७)

कठिनाः शब्दाः

कदर्यम्, अलीकम्, मिथ्यासंकल्पगोचराः, निर्वाणः ।

अभ्यासः

१. सनातनोधर्मं कीदृशः ?
२ कस्मैजनाय पुरूषः स्पृहयति ?
३. सारासारयोः के भेदः ?
४. विपुलं सुखं पश्यता किं कर्तव्यम् ?
५. यत् कृत्वा नप्नुतप्यते इति कथम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशुपति मन्दिर द्वितीयजयदेवस्यामि लेखतः



एषा भाति कुलाधलैः परिवृताः प्रालेय संसर्गिभिः
वंदा मेरुशिलेव काञ्चनमयी देवस्य विश्रामभूः ।
शुभ्रैः प्रान्तविकासिपंकजदलै रित्याकलय्य स्वयम् ।
रौप्यं पद्ममचीकरत् पशुपतेः पूजार्थमत्युज्ज्वलम् ॥१॥

यं स्तौति प्रकटप्रभावमहिमा ब्रह्मा चतुर्भिर्मुखैः
यञ्च श्लाघयति प्रणम्य चरणे षड्भिर्मुखैः षण्मुखः ।
यं तुष्टाव दशाननोऽपि दशभिर्वक्त्रैः स्फुरत्कन्धरः
सेवां यस्य करोति वासुकिरलं जिह्वासहस्त्रैः स्तुवन् ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्यातया यः परमेश्वरोऽपि वहते वासो दिशां मण्डलं
व्यापी सूक्ष्मतरश्च शंकरतया ख्यातोऽपि संहारकः ।
एकोऽप्यष्टतनुः सुरासुरगुरुर्वीतत्रयो नृत्यति
स्थाणुः पूज्यतमो विराजति गुणैरेवं विरुद्धैरपि ॥३॥

कठिनाः शब्दा :—

(१) कुलाधलः, (२) प्रोलेयसंसर्गीः, (३) प्रकटप्रभाव, वीतत्रयः,

अभ्यासः

(१) जयदेवेन किमिति रोप्यग्यमेव पद्यं पशुपतये समर्पितम् ?
(२) जयदेवः कदा कस्मिन् वंशे समुत्पन्न ?
(३) शंकरस्याष्टानां तनूनां नामानि लिखत ।
(४) स्थाणुः कथं विरुद्धै र्गुणै राजति स्पष्टयतः ।
(५) किं नेपालराजधानी परितो विद्यमानाः पर्वताः हिमसंसर्गिणः सन्ति ?
(६) काष्ठमन्डपभूः कथं काञ्चनमयी मेरु शिलेव ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री ५ पृथ्वीनारायणशाहदेवस्य शिलालेखः

घरानवर्तुभूमिते (१६९१) शके, सुमासि माधवे,
सितेऽथ पक्षके, शनौ विधातृभे तिथावहेः ।
विचित्रजालमण्डितं विलासमन्दिरं मुदा
विधाय मन्मथोत्सवं व्यधान्महीपकेसरी । १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्रीमद्दुर्गाङ्घि–रक्ताम्बुज-मधुर-मधुस्वाद.भृङ्गायमाण—

स्तस्या दृक्प्रान्तपातामितपरमकृपावाप्तनेपालराजः ।

दानोद्रेकातिलुब्धभ्रमरगणसमानेकविद्वतप्रशस्तः

पृथ्वीनारायणेशो जयति नृपशिखारत्ननीराजिताङ्घ्रिः । २

राजानः सन्ति नो किं दिशिदिशि धरणीपालवंशाब्धिजाता

द्यूतस्वापाबलासु प्रणिहितमनसो दानयुद्धप्रहीणाः

पृथ्वीनारायणेशो रिपुवनदहनप्रौढदावानलोऽसौ

दाने मेघोपमानो जयति निजधरावारितद्यूतदोषः । ३

समस्तभूपालकुलाब्धिलक्ष्मीमादाय भूमी विहिता विधात्रा

रमाभिरामा पतिविष्णुभावा राज्ञी तदीया हि नरेन्द्रलक्ष्मीः । ४

सूनुद्वयं भूपतिवर्यसिंहादजीजनत् सऽथ कुमारकल्पम्

प्रतापसिंहः प्रथमः, कनीयाँल्लोके बहादुर इति प्रसिद्धः । ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहेनस्तीर्थौ—प्रञ्चभ्याम् ।
विधातृभे—रोहिणीनक्षत्रे ।
माधवे—चैत्रे ।

अभ्यासः

१. श्री ५ पृथ्वीनारायणस्य कीदृशः प्रभाव आसीत् ।
२. श्री ५ पृथ्वीनारायणरचितस्य विलासमदिरस्य परिचयो देयः ।
३. श्री ५ पृथ्वीनारायणस्य अन्येषां राज्ञां च किमतरम् ?
४. श्री ५ पृथ्वीनारायण कस्मिन् वर्षे विलासमदिरं रचितवान् √ एतादृशं चिन्ह देयम

(क) भूमि ऋतु नवधरा वर्षे । (ख) ऋतुनवधरा भूमि वर्षे ।
(ग) नवधरा ऋतु भूमि वर्षे । (घ) धरा, नव ऋतु भूमि वर्षे ।

५. श्री ५ पृथ्वीनारायणस्य राज्ञी √ (चिन्हं देयम्) का आसीत् ।
(क) प्रजालक्ष्मी । (ख) नरेन्द्रलक्ष्मी ।
(ग) राजलक्ष्मी । (घ) राजराजेश्वरी ।

६. तस्य द्वौ पुत्रौ—आस्ताम् (ज्येष्ठे १ कनिष्ठे २ अङ्कितव्यम्)
(क) सिह प्रतापः । (ख) राजबहादुरः ।
(ग) प्रतापसिहः । (घ) बहादुर राजः ।
(ङ) बहादुरः । (च) प्रतापशाहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu